
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

विवेकग्रंथरत्न

सं- १७६०

इ.स- १७०२

Accession no. - ~~8458~~ M1302

Title :- विवेकरत्नग्रंथ

पत्रे :- 98

लेखक - रामानुजदास

समय - संवत 1760

1

१

॥श्रीरामोजयति॥ अस्मदाचार्यमारभ्यश्रीकांतावधिमुक्तमौवैष्णवाचार्यनिश्रेणीमाश्र-
येमुक्तिप्रदां॥१॥इहखलुसकलसात्वतजनजीवातुभूतं॥स्वरूप॥१॥साधन॥२॥पुरु-
षार्थ॥३॥विवेकंचिकीर्षुः श्रीरामानुजदासःस्वस्यतत्तदर्थज्ञानयोग्यतापादिनींगुरुरूप-
रंपरामनुसंधत्ते॥अस्मदेति॥स्पष्टार्थमेव॥आश्रमुक्तिप्रदामिति॥अतिशायेनोच्चैर्यागति-
ःसर्वदेशसर्वकालसर्वावस्थोचितसर्वविधभगवन्नित्यकैंकर्ययोग्यतालक्षणांतांप्र-
कर्षेणानायासेनस्वसंबंधमात्रेणैवददातीतितथातां॥तदुक्तं॥आस्फोटयंतिपितर-
ःप्रनृत्यंतिपितामहाः॥वैष्णवोनःकुलेजातःसनस्तारयिष्यति॥पशुर्मनुष्यःपक्षीवा
येचवैष्णवसंश्रयाःतेनैवतेप्रयास्यंतितद्विष्णोःपरमंपदमित्यादि॥अथब्रह्मसूत्रभा-
ष्यादिभिःपरपक्षप्रक्षेपपूर्वकमस्मदादिपामरानपिरक्षितवंतंश्रीरामानुजाचार्य-

जीवनौषधं

१

र्थं प्रणमतीति ॥ शेषावतारं तमशेषविज्ञं रामानुजाख्यं कलिलोकबंधुं श्रुतिस्मृतीनां स्वांतदुरं
तचिंतासंतापनिर्वापकमाश्रयेहं ॥ २ ॥ श्रुतिस्मृतीनां स्वांतेषु चित्तेषु याऽदुरंतचिंताऽयथा
र्थव्याख्यानजनितग्लानिस्तया संतापस्तं परपक्षप्रक्षेपपूर्वकयथार्थव्याख्यानेन निर्वा
पयति शमयतीति तथा तं स्पष्टमन्यत् ॥ अथातिशयितसौलभ्यादिगुणं दामोदरलीलावं
जितात्पर्यमक्रूवात्सल्यं श्रीकृष्णाख्यं परमपुरुषमभिलषितविशेषमर्थयितुमनुसंधत्ते म
॥ अनंतेतिद्वाभ्यां ॥ अनंतकल्याणगुणैकधामा दुरंतदुःखालिविनाशिनामा ॥ दिव्योदरो
दंचितदीर्घदामा ममाश्रयः कोपि सकृष्णनामा ॥ ३ ॥ लोकोत्तरार्थं ललितानुबंधत्वदीयलो
कादरणीयमीश ॥ समस्तलोकोपकृतिक्षमं च यन्मे बलमेव ग्रयय प्रपन्नात् ॥ ४ ॥ अनंतक
ल्याणगुणानामेकं मुख्यं धाम यस्मिन्नित्यर्थः ॥ स्पष्टार्थमेवैतत्पद्यद्वयं ॥ एवं गुरुपरंपरामि

श्रुतिशिरग
म्य:

(3)

ष्टदेवतां चानुस्मृत्य संप्रार्थ्य च कर्त्तव्यांगं प्रतिजानीते विवेकेति विवेकत्रयरत्नेस्मिन् गुरू
णां करुणाबलात् ॥ स्वरूपो ॥ १ ॥ पाय ॥ २ ॥ साधनानां ॥ ३ ॥ विवेकः क्रियते मया ॥ ४ ॥ तत्रैरूपं
चिद चिद्ब्रह्मरूपेण तु त्रिधेति ॥ स्वरूपं तु चित्स्वरूपं ब्रह्मरूपमिति त्रिधेत्यर्थः ॥ तत्र चित्स्व
रूपं शोधयति ॥ चित्स्वरूपं तु देवादिदेहादिभ्यो विभिन्नं द्योतते इति ॥ देवतिर्यङ्मनुष्यस्थावररू
पचतुर्विधशरीरत्वमात्मनो नास्तीत्यर्थः ॥ तथाहि ॥ चार्वाकमते तस्य प्रत्यक्षमेव प्रमाणं तत्सिद्धै
र्मतैरेवं चित्रशक्तिर्निर्देहस्यारम्भते न त्वदृष्टं नाम किमप्यस्ति यथेष्टाचरणमेव धर्मः ॥ देहना
शो मोक्षः स्नातत्वादिकमपि देहधर्म इति ॥ तदयुक्तं ॥ ज्ञानस्य देहधर्मत्वे घटेपि तत्प्रतीयेत सजी
व निर्जीवव्यवहारोपि नोपपद्यते ॥ न च संस्थानविशेषेण देहे तदुपलब्धिरिति वाच्यं मृतदे
हेपि तत्प्रसंगात् ॥ अपरं च ॥ मम देहः शरीरमिति देहात्मनोर्भेदप्रतीतिरेव तथात्वे प्रमाणं ॥ न च

व

२ स्व मुक्ति स्वरूप २

राहोः शिर इतिवदौपचारिकोऽभेद इति॥ तत्र तात्त्विकभेदाभावात्॥ अत्र त्वबाधितप्रत्य
क्षसिद्धो भेदः किंच॥ जातमात्रस्य स्तन्यप्रवृत्त्यन्यथानुपपत्त्या जन्मांतरीयसंस्काराश्रयत्वे
न देहातिरिक्तः सिध्यत्येवात्मा तथा विष्णुपुराणे॥ पंचभूतात्मके देहे देही मोहतमोवृत
ः॥ अहंममेति चेतस्त्वैः कुरुते कुमतीरतिं॥ आकाशवाय्वग्निजलपृथिवीभ्यः पृथक्स्थि
ते॥ अनात्मन्यात्ममयं भावं कः करोति कलेवरे इत्यादि॥ न चेंद्रियाण्यात्मा॥ चक्षुरादिभी
रूपाद्यनुभवामि इत्यबाधितभेदप्रतीतेः॥ योऽहं द्रष्टा स एवाहं स्पृशामीति प्रतिसंधातुर
रेकस्य प्रतिपन्नत्वात् चक्षुरादिनानुप्रतिनियता रूपादय एवानुभाव्याः नापि मनः॥ मम
नो मे निर्मलं मनसा सर्वं विदितं मयेति तस्य ज्ञानकरणत्वेन प्रतीतेः कर्ता ह्यात्मा॥ अत एव
प्राणोऽपि न॥ मम प्राणा गच्छंतीत्याद्यनुभवात्॥ नापि बुद्धिरात्मा इदमहं जानामीति ज्ञातुः

जीवस्य ५
ज्ञानस्य ५

धर्मतया प्रतीतेः ॥ ज्ञानं जातं तस्येति ज्ञातुः प्रतिसंदधातुरेकत्वं न युज्यते ॥ ज्ञानस्वरूपं ज्ञानगुणमहमर्थोऽणु निर्मलं ज्ञानवत्परतंत्रं च स्वस्मै च स्वप्रकाशकं ॥ ज्ञानस्वरूपमित्यनेन ॥ तस्य जडत्वव्यावृत्तिः सर्वावस्थास्वहमहमिति नैरपेक्ष्येण प्रतीतेः श्रुतिश्च ॥ अत्रायं पुरुषः स्वयंज्योतिरिति ॥ ज्ञानगुणमित्यनेन ॥ धर्मभूतस्यापि ज्ञानस्य नित्यत्वं तदाश्रितत्वं च श्रुतिसिद्धं न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति ॥ यथा तेजोरूपस्यापि सूर्यादेः प्रभाश्रयत्वं तथा ज्ञानरूपस्यापि ज्ञानाश्रयत्वमुपपद्यते ॥ अहमर्थः ॥ अहंबुद्धिवेद्यः धर्म्यणुः ॥ अणुपरिमाणं ॥ एषोऽणुरात्मा चेतसा वेदितव्यः ॥ यस्मिन्प्राणः पंचधा संविवेश ॥ वालाग्रशतभागस्य शतधा कल्पितस्य च ॥ भागो जीवः स विज्ञेयः स चानंत्याय कल्पत इत्यादि श्रुतेः ॥ सूक्ष्माणामप्यहं जीव इति स्मृतेश्च ॥ अणुत्वेऽपि सर्वदेहव्याप्तिः धर्मभूतज्ञानद्वारा युज्यते ॥ दीपस्येव प्रभाद्वारा गृहांतर्मंडल

व्याप्तिः ॥ छांदोग्ये ॥ स त्रय्या वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोतीति ॥ ब्रह्मांडे ॥ अणु
मात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति ॥ यथा व्याप्य शरीराणि हरिचंदनबिंदुवदिति ॥ न च वि-
भुरात्मा ॥ सर्वेषामात्मनां सर्वत्र संनिधानाविशेषात् शरीरादीनामविशेषप्रसंगात् ॥ न च
कर्मणां व्यवस्था ॥ कर्मणां करणसाध्यत्वेन तदुत्पन्नत्वेन साधारण्यापाताभावात् ॥ किंच ॥ अणुत्वे
पि सौभर्यादीनां योगजधर्मविशेषोत्थशक्तिविशेषेणानेकदेहाधिष्ठातृत्वेनासमंजसं ॥ त्वया
पि मनोवच्छिन्नस्य जीवत्वांगीकारात् तथैव मंतव्यमिति न कश्चिद्दोषः ॥ तदुक्तं स्कंदे ॥ अणुमात्र-
मपि तिच व्यवस्थाभेदतः सुराः व्याप्तियुतास्त्वमे चित्रुणैनैव नान्यथा ॥ चित्रुणस्य स्वरूपत्वात्-
तद्व्याप्तिश्चेति गीयते ॥ शक्तियोगात्सुराणां तु विविधा व्यवस्थितिरिति ॥ निर्मलं ॥ सर्वदा स्वरूप-
प्रयुक्ताविद्यादिमलरहितं ॥ भागवततंत्रे ॥ तत्प्रसादैकजनितज्ञानक्रियाशक्तिकं योगिप्रकृति

८

स्य ॥ कर्तृत्वं करणत्वं च स्वभावश्चेतना धृतिः ॥ यत्प्रसादादिमे संति न संति यदुपेक्षया इति न च
विधिनिषेधशास्त्रवैयर्थ्यं जीवकृतप्रयत्नादिसापेक्षत्वाद्भगवतः ॥ तदुक्तं तद्विषये ॥ पूर्वक
र्मप्रयत्नं च संसारं चाप्यपेक्ष्य तु ॥ ईश्वरः कारयेत्सर्वं तच्चेश्वरकृतं भवेत् ॥ अनादित्वाद्दोषस्य
पूर्णशक्तित्वतो हरिरिति ॥ स्वस्मै च स्वप्रकाशकं ॥ ज्ञानांतरमंतरेण स्वप्रकाशकत्वं ॥ धर्मभूत
ज्ञानस्यास्तीति स्वस्मा इत्युक्तं ॥ ज्ञानं तु स्वाश्रयस्यात्मन एव स्वयं प्रकाशते न तु स्वस्मै ॥ आत्मा तु
अहमिति स्वात्मानं प्रकाशयति ॥ स्वस्मै न त्वन्यस्मै ॥ स्वरूपभूतज्ञानस्य धर्मभूतज्ञानाद्विशेषं स्व
स्मै स्थितत्वं विषयप्रकाशकत्वमप्रकाशकत्वाभावश्च ॥ धर्मभूतस्य स्वरूपाद्विशेषः परस्मै ॥ प
स्थितत्वं विषयप्रकाशकत्वं चाप्रकाशाभावः स्वरूपानुभववेलायां स्वरूपे उत्कर्षः स्वव्यतिरिक्ता
नुभववेलायां धर्मभूते उत्कर्ष इति ॥ कर्तृत्वोक्तया ज्ञातृत्वभगवच्छेषमेव च अचिद्वियोगयोग्या

ईशमनेकं च समीरितं ॥ अज्ञातत्वादयं स्यात्मनः स्वाज्ञाविकाधर्माः ॥ एष हि द्रष्टा इत्यादिश्रुते
ः ॥ नत्वात्मनः साक्षित्वमेवयत्ते ॥ तथापि साक्षाद्दृष्टरि संज्ञायामिति साक्षात्कारज्ञानवत एव सा
क्षित्वं कर्तृत्वादिकं च तद्वितरिरेव ॥ प्रकृतेः क्रियमाणानीत्यादिवाक्येष्वापि न कर्तृत्वहानिरु
च्यते ॥ किंतु पराधीनत्वमेवेति ॥ भगवच्छेषं भगवदिष्टवियोगानर्हं ॥ यस्यात्माशरीरमित्यादि
श्रुतेः निवाशेसेय्यासनेत्यादिश्च ॥ अचिदिति स्वकृतकर्मवशात यादेहसंयोगवियोगार्हमि
त्यर्थः ॥ अनेकं ॥ नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामानिति श्रुते
ः प्रतिशरीरं भिन्नमित्यर्थः ॥ एकात्मवादे त्वन्येनानुभूतोर्थोन्येन स्मर्येत ॥ दृष्टं हि एकशरी
रावच्छिन्नत्वमाद्यादीनामेकाश्रयतया प्रतिसंधानं ॥ गुरुशिष्यादिव्यवस्थानुपपत्तिश्च ॥ अनु
मानं च देवदत्तः यज्ञदत्ततादात्म्यशून्यः तदनुभवजन्यस्मरणानाधारत्वात् ॥ कदाचिदपि तद्

५

तत्सुखादिप्रतिसंधानरहितत्वात्स्वयन्नैवं यथा यज्ञते इति ॥ एवं जीवस्य स्वात्माविकं रूपं निरू
प्यमायावशादन्यथात्वमप्याह ॥ अनादिमायया छन्नस्वरूपगुणमेव च ॥ श्रीशप्रसादाद्विज्ञा
तस्वरूपगुणवैभवं ॥ स्वरूपं शेषत्वादिगुणा ज्ञानानंदादयः ॥ तर्हि अनादिमायाछन्नत्वादनि
र्मोक्षप्रसंग इत्यत आह श्रीपतिप्रसादेन पुनस्तदाविर्भावान्मोक्षोपि घटत इत्याह श्रीशेति ॥ श्री
शश्रीदेन लक्ष्मीकांतस्य वरज्ञकत्वं सूचितं तदुक्तं ब्रह्मा सह हृषीकेशो दिव्याकाररूपेण रूपया
रक्षकः सर्वसिद्धांते वेदांतेपि च गीयते इति ॥ एवं चित्स्वरूपं निरूप्य तद्भेदानाह चेतना इत्या
दिना ॥ चेतना द्विविधाः प्रोक्ता बद्धमुक्तप्रभेदतः ॥ बद्धा मुमुक्षवः श्रापि बुभुक्षव इति द्विधा ॥ तत्र
बद्धाः अनादिकर्मजनितचतुर्विधदेहतत्संबंधिष्वहंताममतावंतः ॥ मुक्तास्त्वज्ञानाध्वस्ते देहादा
वहंताममतानिवृत्तिपूर्वकस्वरूपप्राप्तिमंतः तदुक्तं ॥ मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थि

५

तिरिति । बद्धा मुमुक्षवश्चापि बुभुक्षव इति द्विधा बद्धा द्विधा मुमुक्षवो बुभु ॥ क्षवश्चेत्यन्वयः मु
मुक्षवो भगवतो निर्हेतुककटाक्षेणाविद्याकर्मवासनारुचिप्रकृतिसंबंधान्मोक्तुमिच्छवः सां
सारिकविषयभोगेच्छवो बुभुक्षवः । तत्र मुमुक्षूणां द्वैविध्यमाह ॥ ज्ञानाद्यसाधनाश्चैव ॥ चेतनां
तरसाधनाः मुमुक्षवोपि द्विविधाः प्रोक्ताः पूर्वतनर्षिभिः ज्ञानाद्यसाधनाः फलसंगरहितक
र्तृत्वत्यागपूर्वकानुष्ठितवर्णाश्रमोचितविहितकर्मयोगसमुत्थिततैलधारावदविच्छिन्न
स्मृतिसंतानरूपसाक्षात्कारपर्यंतभक्तिनिष्ठावंतः ॥ एवं द्विविधोपासकाश्च स्युर्द्विभक्ता इति
स्मृताः तत्रोपासकास्तत्तद्देवतांतरमंत्रविहितध्यानपूजनपुरश्चरणादिनिष्ठाः तेषु देहारंभ
ककर्मनिवर्तकसाधनाश्चात्मानुभव ॥ प्रतिबंधनिवर्तकसाधना इति द्विधा ॥ केवलप्र
विरोधिमुमुक्षवोंतर्भावाः शुद्धभक्तास्तु भगवच्छ्रवणकीर्तनवंदनमात्रनिष्ठाः तेषु भग

६

वत्स्वरूपगुणादिसाक्षात्कारानंदप्रतिबंधकात्मोक्षामिछवो भगवदनुभवविरोधिमुमुक्षु
वों तन्मार्गाः चेतनांतरसाधनास्तत्स्वानुष्ठितकर्मज्ञानादीनां प्रधानसाधनत्वमंगीकृत्य॥
कंचनसंबंधविशेषं लब्ध्वा मोक्षे निश्चयवंतः॥ ते च प्रपन्नाः पुरुषकारनिष्ठा इति द्विधा॥ प्रप
न्नास्तु विहितोपायत्रयं हित्वा परमचेतनं परमसमर्थं परमदयालुं परमप्राप्यमीश्वरमेव
निरपायोपायमध्यवस्य स्थिताः॥ पुरुषकारनिष्ठास्तु ईश्वरस्यातंत्र्यमालोच्य किंचित्संकु
चंतः॥ कृपाप्रचुरमाचार्यमेवोपायं मत्वा स्थिताः यथा ज्ञात्रबंधुप्रभृतयः॥ ते त्वाचार्यकृपामा
त्रप्रपन्नाः स्वव्यतिरेकप्रपन्नाश्चेति द्विधा ज्ञेयाः॥ प्रपन्नास्वपि दृप्तास्तथार्ता॥ इति द्विविधाः॥ दृप्त
प्रपन्नास्तु परिगृहीतशरीरस्थितिपर्यंतमत्रैव यथोचितप्राप्तसुखदुःखादिकमगणयंत
ः शरीरावसाने मोक्षसिद्धिमध्यवस्य स्थिताः॥ आर्तप्रपन्नास्तु संसारमसहमानास्तत्क्षणमे

६

(12)

वद्भगवत्साहौसरलहृदयाः ॥ अथ मुक्तानां भेदमाह ॥ नित्येति ॥ नित्यकादाचित्कभेदान्मुक्तास्त्रि
हिता द्विधा ॥ तत्र नित्या नाम कदाचिदपि गर्भजन्मजरादिदुःखमननुभूय स्थिताः ॥ अनंतवैनतेय
विष्वक्सेनादिनित्यसिद्धपुरुषा नित्यलेप्रमाणं तद्विष्णोः परमं पदं सदा पश्यंति सूरय इति ॥ ध्रुवा
यो अस्य कीरयो ऊनास इति ऋग्वेदे ॥ कीरयः आलमनिक्षेपकर्त्रीराजनायोजना ध्रुवासः ध्रुवा नित्या
इत्यर्थः ॥ नकहिंचिन्मत्पराः शांतरूपे नंक्ष्यंति नो निमिषो लेढि हेतिरिति ॥ श्रीभागवततृतीयस्कं
धे ॥ कादाचित्कास्तु भगवन्निर्हेतुककटाक्षसंबंधेनानादिरज्ञानाद्विमुक्ताः सकलसंकोचापाये
भगवत्स्वरूपगुणविभूतीर्भगवत्प्रसादेनैव करतलामलकवत्साक्षात्कृत्य प्रियः सतास सहसा
लोक्यसारूप्यसामीप्यसार्ष्टिसायुज्यान्यनुभूय तदनुभवजनितप्रीतिविशेषेण वस्थानस्थले
ष्ववतिष्ठमानाः सर्वदेशसर्वकालसर्वावस्थोचितकैंकर्यशेषवृत्तिं कुर्वाणाः सैव कामुक्तौ नित्य

स

७

मुक्तानां द्वैविध्यमाह ॥ नित्याः परिजना मुक्तास्तथैवोक्ताः परिच्छदाः ॥ नित्यमुक्ताः परिजनाः प
रिच्छदा इति द्विधोक्ता इत्यर्थः परिजनाः अनंतगरुडविष्वक्सेनादयः ॥ परिच्छदास्तु किरीटमुकु
टशंखचक्राद्याभरणायुधवर्गाः ॥ आत्मारामाणामपि मनोमोहावहत्वादात्मत्वमेव परिच्छदाना
मित्यग्रे निरूपयिष्यामः ॥ कादाचित्कमुक्तेषु भेदमाह ॥ कादाचित्कानां भगवतां कैवल्याख्येति द्वि
धा ॥ भगवत्तां भगवत्पराः शेषत्व स्वरूपानुरूप भगवत्स्वरूपगुणविभूति साक्षात्कारानंद नि

परिपूर्ण

परिपूर्णाः ॥ इतराः केवलाः पर्यवसानभूमिरूपभगवदनुभवमलब्ध्वानुभूतपर्वणि स्थिताः ॥ यस्त्वा
त्मरतिरेव स्यादात्मतृप्तश्च मानवः ॥ आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ इत्यत्रोक्ताः भगव
त्पराणां भेदमाह ॥ आद्या इत्यादि द्विविधेष्वेतेष्वाद्या गुणानुसंधानपराः कैंकर्यतत्पराः ॥ इति द्वि
धा गुणानुसंधानपराः स्वामित्वसौलभ्यसौशील्यादिगुणगणपरिशीलनपरवशाः ॥ कैंकर्य

७

तत्पराः दाम्भनिर्माणादिक्रियापराः॥ केवलानां द्वैविध्यमाह॥ केवलाश्च दुःखाभावैकतत्पराः इति द्विधा
आत्मानुभूतिपरमा इति द्विधा समीरिताः॥ केवलास्तु दुःखाभावैकतत्पराः जरामरणमोक्षाय
मामाश्रित्य यजंति ये॥ इत्यत्रोक्ता दुःखप्रातिकूल्यानुसंधानेन तन्निवृत्तिमात्रनिष्ठाः॥ आत्मा
नुभूतिपरमाः॥ स्वस्वरूपानंदसाक्षात्कारसंतुष्टाः॥ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानव
ः॥ आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते इत्यत्रेनोक्ताः॥ अथाचित्स्वरूपमाह॥ प्राकृताप्राकृत
तया कालरूपतया तथा॥ अचित्स्वरूपं त्रिविधं पूर्वाचार्यैरुदाहृतं॥ अचित् त्रिधा प्राकृताचित्
॥ कालश्चेत्यर्थः॥ तत्र प्राकृताचित्स्वभावमाह॥ तत्रचौं जडत्वं गुणकार्यत्वं परिणामित्वमेव च॥
आच्छादनं निजपररूपयोः प्राकृतौ चिदिति॥ जडत्वं निजस्वरूपाज्ञातृत्वं गुणकार्यत्वं सत्त्वादिगु
णजन्यत्वं परिणामित्वमन्यथाभाववत्वं निजपररूपयोः स्वात्मपरमात्मस्वरूपयोः॥ आच्छाद

८

नंच प्राकृताचिति॥ धर्मविशेषाश्रेयाइत्यर्थः॥ अप्राकृताचित्स्वभावमाह॥ अप्राकृताचितिज्ञा
नजनकत्वंशरीरता॥ स्वेच्छानुरूपोपितथापरिणामोस्त्वेवदितिज्ञानजनकत्वेस्वरूपापन्नज्ञा
नानाच्छादकत्वंअस्यलौकिकशरीरभावः भगवद्विग्रहस्यपंचोपनिषन्मयत्वश्रवणात्॥ त
त्वोपनिषन्मंत्रप्रधानपंचात्मरवाच्याप्राकृतद्रव्यपंचकमयत्वंतत्रज्ञानानंदमयत्वमपिश्री
विग्रहस्यसिध्यतितत्रदिच्छानुसारेणमानुषामानुषाकारेणपरिणतिश्चाप्राकृताचित्स्व
भावइत्यर्थः॥ कालरूपस्वभावमाह जडत्वेविभुतातथा॥ कलाकाष्ठादिरूपत्वंसृष्ट्यादीनां
सहायता॥ उपकरणत्वंस्पष्टमन्यत्॥ एवमाद्याविशेषास्तज्ज्ञेयाः प्रकरणांतरे॥ अथब्र
ह्मस्वरूपमाह॥ बृहद्गुणत्वाद्ब्रह्मेतिप्रोच्यतेभगवान्परः॥ बृंहतेह्यस्मिन्गुणास्तद्ब्रह्मेति
श्री श्रुतेः बृहत्वाद्बृंहणत्वाच्चतद्ब्रह्म [स] भिधीयतइतिस्मृतेश्चब्रह्मपरिबृंहणेबृधिकत्वइतियास्क ८

निरुक्तेश्च ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदो(षो)ऽनवधिकातिशयासंख्येयकल्याणगु
गणः पुरुषोत्तमोऽभिधीयत इति भाष्यकारोक्तेश्च ॥ भगवान् पूर्णषाड्गुण्य एव सर्वेश्वरः प्रोच्यत
इत्यर्थः ॥ उक्तं च वैष्णवे ॥ शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते एवमेष महाशब्दो मैत्रेय भग
गवानिति ॥ परमब्रह्मभूतस्य वासुदेवस्य नान्यग इति स च निखिलहेयप्रत्यनीकानंतकल्या
णगुणाकरो दिव्यमंगलविग्रहविशिष्टोऽनंतपरिजनसेव्यमानः ॥ स्वानुरूपदिव्याभरणायुधपरि
वृतः परमपदनिलयः श्रीभूनीलासमेतो लीलाविभूतिनायकः ॥ सर्वेश्वरः एक एव तस्य
च निरवद्य निरंजनं ॥ विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसीति न ते वि
ष्णो जायमानो न जातो देव महिम्नः परमंतमाप इति ॥ सहस्रधाम महिमानः ॥ सहस्रं इत्यादिश्रु
श्रुतेः निर्दोषानंतकल्याणगुणाकरत्वं सिद्धं ॥ गुणात्मनस्तेऽपि गुणान्नूयो वाऽनंतस्य गु

श्री
रा

६

णानंतान् ॥ ५ ॥ कोनामतस्येत ॥ ३ ॥ नांतं गुणानामगुणस्य जग्मुर्योगीश्वरा ये भवपाद्म
मुख्याः नांतं विदाम्यहममी मुनयोग्रजास्ते मायाबलस्य पुरुषस्य कुतोपरे ये गायन् गुणा
न् दशशतानन आदिदेवः शेषोधुनापि समवस्यति नास्य पारं ॥ इत्यादिस्मृतेश्च ॥ ननु कथं
दिव्यमंगलविग्रहविशिष्टत्वं भगवतः विग्रहस्य कर्माधीनत्वादिति ॥ अत्रोच्यते ॥ भगवद्विग्र
हस्यानेकश्रुतिस्मृतिसिद्धत्वान्न संदेहः ॥ तथाहि छांदोग्ये ॥ य एषोंतरादित्ये हिरण्मयः पुरु
षो दृश्यते ॥ हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरी
कमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो
य एवं वेदेति कप्यासमित्यस्यार्थः ॥ कं जलं पिबतीति कपिर्नालं तत्रास्ते इति कप्यासं तेनाम्भ
नमित्युक्तं भवति ॥ तादृशं पुंडरीकं यथा एवं ॥ तस्याक्षिणी इति सुवर्णः अप्राकृतः प्राकृतसे

६

वद्देहस्य कर्माधीनत्वेन्नावद्विग्रहस्य प्राकृतत्वान्न तथात्वेन्नारते ॥ नन्वतसंघसंस्थानो
देहोस्य परमात्मनः ॥ वृहद्देहस्य वो ॥ यो वेत्ति नौतिकं देहं कृष्णस्य परमात्मनः ॥ स सर्वस्माद्बहि
ःकार्यः श्रौतस्मार्त्तविधानतः ॥ मुखं तस्यावलोक्यापि सचैलं स्नानमाचरेत् ॥ धरणीद्वोषसंवा
दे सच्चिदानंदविग्रहमिति ॥ उपनिषदि तमेतं गोविंदं सच्चिदानंदविग्रहमिति ॥ ननु विग्रहा
दिशब्दानामात्मवाचकत्वमेवेति चेन्नन्वतमी पुष्पसंकाशं नाभिस्थाने प्रतिष्ठितमिति ॥ विंदू
पनिषदि दुर्दर्शमिति गंभीरमजं रूपामं विशारदमित्यत्वान्नोपनिषदि ॥ पद्मकोशप्रतीका
शमिति ॥ महोपनिषदि ॥ प्रकृत्या सहितः श्यामः पीतवासा जटाधर इति ॥ रामतापिन्यां ॥ पुरुषं
कृष्णपिंगलमित्यादिना वर्णविभागोक्तेः ॥ जरामरणनिर्मुक्ताः सर्वधर्माः स्वभावत इत्य ॥ त्वातोप
निषदि ॥ जरामरण देहात्मन्यप्रसक्तत्वाच्छरीर एव तन्निर्मुक्तवचनेपं गच्छते सस्मितं भाव

१०

यन्मुमैरिवेत्यादेः ॥ श्रीभागवतादिषु बहुशः श्रुतत्वाच्च किं श्रीभाष्यकारेणापि श्रीभाष्ये उक्तं
॥ यथास्यादेतत् ॥ यदि त्रिगुणमयः प्राकृतोऽस्य देहः स्यात् सत्त्वसत्त्वाभिमतानुरूपरूपो प्रा
कृत एवेति सर्वमुपपन्नमित्यादि तदिदमाह श्रुतिः ॥ अजायमानो बहुधा विजायते तस्य धीराः प
परिजानंति योनिमिति स्मृतिश्च ॥ अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन् ॥ प्रकृतिं
स्वामधिष्ठाय संभवाम्यात्ममायया ॥ परित्राणाय साधूनां विनाशाय च दुष्कृतामिति ॥ अत्र
प्रकृतिं स्वामिति ॥ प्रकृतिः स्वभावः ॥ स्वमेव [illegible] स्वभावमास्थाय न संसारिणामिवेत्यर्थः ॥ आ वै
त्ममाययेति स्वसंकल्परूपेण ज्ञानेनेत्यर्थः माया वयुनं ज्ञानमिति नैघंटुके ज्ञानपर्यायतोक्ते
ः कश्चिद्धीर प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु
तं पश्यति निष्कलं ध्यायमान इत्यादि श्रुत्या तस्य दृश्यत्वमप्युच्यते ॥ अश्मालवनस्याज्ञाक्य

१०

20

अहमेवंविधोर्ज्जुनज्ञातुंद्रष्टुंचतत्वेनप्रवेष्टुंचपरंतप॥मयाप्रसन्नेनतवार्ज्जुनेदंरूपंपरं
दर्शितमात्मयोगादित्यादिनातद्दर्शनस्यदुर्लभत्वानन्यभक्त्यैकलभ्यत्वोक्तेश्चनप्राकृतत्वं
तथाकल्पितत्वेनभगवतःप्रतारकत्वदोषापत्तेंकिंचसऐक्षतेतिश्रुतिरेवसशरीरत्वेप्रमाणं
ईक्षणंहिचक्षुर्व्यापारो॥वाउन्नयोरपिशरीरमंतरेणानुपपत्तेंतेनेब्रह्महृदाय॥आदिकवये
इतिस्मृतेश्चकिंचाजस्यनाभ्यावध्येकमर्पितंयस्मिन्॥विश्वानिभुवनातस्थुरितिऋग्वेदे
अपरंचसविश्वकृत्सहिसर्वस्यकर्त्तेतिश्रुतेर्जन्माद्यस्ययतइतिसूत्राच्चतस्यकर्तृत्वेनि
र्विवादे॥ईश्वरःसविग्रहःज्ञानेच्छाप्रयत्नवत्कर्तृत्वात्कुलालवत्॥सचविग्रहोनित्यईश्व
रकरणत्वात्ज्ञानवत्॥इत्याद्यनुमानेनापितत्सिद्धिः॥अत्रकुमत्युद्भावितितिरोधानादिकं
श्रुतिसहायतयामंदवलमितिसर्वंसमंजसं॥आहचभगवान्पराशरःसमस्ताःशक्तय

ष्वेतान्यपमन्त्रप्रतिष्ठिताः॥ तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्॥ समस्तशक्तिरूपाणि॥
तत्करोति नरेश्वर देवतिर्यङ्मनुष्याख्यचेष्टावंति स्वलीलया जगतामुपकाराय न सा कर्म
निमित्तजेति सर्वमिदमुक्तं ईश्वरस्य शरीरमित्यादौ तु श्रीयते नित्यमेवास्माद्विष्णोस्तु जगदीद
नं॥ रमते च परो यस्मिन्शरीरं तस्य तज्जगदिति निरूक्तं शरीरपदवाच्यत्वं जगति॥ ए
तस्य तु नित्यत्वं॥ धर्मिग्राहकप्रमाणसिद्धमिति॥ किंच मुक्तानामपि नित्यशरीरश्रवणाद्भग
वति कैमुत्यमेवापतितं॥ तथाहि॥ प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुं॥ आरब्धकर्मनिर्मा
णो न्यपतत्पांचभौतिकः॥ इत्यनेन भागवततनूनामप्राकृतत्वमपांचभौतिकत्वमकर्मारब्ध
त्वं चोक्तं॥ न कर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नो मे निमिषो लेढि हेतिः येषामहं प्रियआत्मासुत
श्च सखा गुरुः सुहृदो दैवमिष्टमित्यनेन नित्यत्वं चोक्तं ये धर्मकामार्थविमुक्तिकामा भजंत

रुष्यं गतिमाक्रवंति॥ किं त्वाश्लिषो रात्यपि देहमव्ययं करोतु मे दत्तदयो विमोक्षणमिति
॥ गजेंद्रस्तुतौ श्वव्ययदेहदानोक्तेश्च॥ ननु जन्मस्य कथं नित्यत्वं उच्यते॥ नह्यनित्यत्वे जन्म
त्वं प्रयोजकं अपि प्राकृतत्वं कर्मारब्धत्वं चेति ब्रूमः तदेवं भगवद्विग्रहः सिद्धः तस्य दिव्यमं
गलत्वं च॥ महावराहे सर्वे नित्याः शाश्वताश्च देहास्तस्य महात्मनः॥ हानोपादानरहिता नैव प्र
कृतिजाः क्वचित् परमानंदसंदोहा ज्ञानमात्राश्च सर्वतः सर्वे सर्वगुणैः पूर्णाः सर्वदोषवि
वर्जिता इति सर्वगुणैः पूर्णा इत्यनेन पंचोपनिषन्मयत्वादि आत्मस्वरूपतदाश्रयकल्याण
गुणप्रकाशत्वैकरूपत्वापरिमिततेजस्त्वनित्ययौवन लावण्य सर्वगंधातिमनोहरनि
त्यमुक्तभोग्यत्वमुमुक्षुशुभाश्रयत्वादयो गुणा ज्ञेयाः विष्णुपुराणे॥ तद्विश्वरूपवैरूप्यं रू
पमन्यद्धरेरिति॥ अनंतपरिजनपरिसेव्यमानत्वं सनकादि निर्दिष्टं यथाहतीये॥ तं त्वाग

१२

येष्पु

तं प्रतिहतौपयिकं स्वपुंसि रिति ॥ निषेव्यमानं सचिवैर्यथोचितमिति च ॥ यामुनाचार्य
स्तोत्रे स्वानुरूपदिव्याभरणायुधपरिष्कृतत्वं ॥ स्वानुरूपत्वं नाम चैतन्यमयत्वेन नित्यत्वां
गमाहितत्वं तत्ती[illegible] क्तं ॥ चैतन्यतत्वममलं मणिमस्य कंठे इति द्वादशे ॥ कौस्तुभमप्यदेशेन
स्यात्मज्योतिर्बिभर्त्यज इति ॥ विष्णुपुराणे ॥ आत्मानमस्य जगतो निर्लेपमगुणामलं बिभ
र्ति कौस्तुभमणिस्वरूपं भगवान्हरिरिति ॥ आयुधानामपि चक्रादि निर्मिमूर्त्रिधरे निजायुधै रि
ति मत्रिधरत्वेन चैतन्यरूपत्वं प्रसिद्धमेव ॥ नारायणकवचादिषु तत्स्वार्थनाम्नैते च ॥ चक्रं
युगांतानलेति गदे शानिस्पर्शन विस्फुलिंगे निष्पिंढि निष्पंद्यजितप्रियासि कूष्मांडवैनायक
यक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् इत्यादि तत्र द्रष्टव्यं ॥ तमद्भुतं बालकमंबुजेक्षणमित्यत्र
तस्माहि ये नावतारस्य वर्णश्चैतन्यमयत्वेनासंतन्नेदान्नावाच्छतादात्म्यं च परिच्छेदानं तेयं

१२

२४

रा तत्तदभिप्रायेणैवोक्तं ॥ नारायणवर्मस्तोत्रांते ॥ यथैकात्म्यानुभावानां विकल्परहितः स्वय
यंभूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया तेनैव सत्यमानेन सर्वज्ञो भगवान्हरिः ॥ पातु
सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वग इति ऐकात्म्यानुभावानामात्मारामाणां ॥ तदंगप्रत्यंगाभेदयाथा
र्थ्येपि स्वयं विकल्परहितः तैश्चैतन्यमयत्वेनाभिन्न एवानुभूत इत्यर्थः ॥ तथैव स्वमायया स्वरू
पभूतान्भूषणाद्यभिधास्तद्वित्रिरूपाः स्वाकाररूपाः शक्तीश्च धत्ते ताश्चापि तैस्तथानुभूता इत्य
र्थः ॥ तेनैव विद्वदनुभवप्रमाणेन तद्यदि सत्यं स्यात्तदेत्यर्थः तैरेव भूषणादिलक्षणैः सर्वै
ःस्वरूपैः स्वरूपांशैर्नः पात्वित्यर्थः तेन पूर्वोक्तं परिच्छेदानां चिद्रूपत्वं साधितं ॥ अथ परमप
दनिलयत्वं ॥ श्रुतिश्च ॥ स भगवः कस्मिन्प्रतिष्ठित इति स्वमहिम्नीति अनेन श्रीवैकुंठ
स्यैव तस्यानंदमयरूपत्वमुक्तं दिव्ये ब्रह्मपुरे ब्रह्मैष परमात्मा प्रतिष्ठित इति एष आत्मालो

वेदबोधितं वैकुंठलोकं

१२

कइतियत्रतत्सूक्ष्मं परमं वेदितव्यं नित्यं पदं वैष्णवमामनंति एतल्लोकान विदुर्लोकिकयारं
विदंतितत्कवयो योगनिष्ठा इति पिप्पलादशाखायां श्रीशुकेनाप्युक्तं॥ स्वलोकं न विदुस्ते वै
यत्र देवो जनार्दनः श्वादुर्धूम्रधियो वेदं [illegible]धितं वैकुंठलोकं सकर्मकमतद्विदः॥ इतिस्व
स्वरूपमुक्तं चैतन्यानंदमयत्वात्॥ अस्य चिदानंदमयत्वेऽप्यप्राकृताचिद्विशिष्टत्वेन द्रष्टव्य
मासरः॥ प्रासादविमानादिनानावैचित्र्यनिरस्तजातिकं ज्ञेयं॥ तथोक्तं पाद्मोत्तरखंडे॥ त्रिपा
द्विभूते ह्लोकास्त्वसंख्याताः प्रकीर्तिताः शुद्धसत्वमयाः सर्वे ब्रह्मानंदसुखाह्वयाः॥ सर्वे नित्या
त्यानिर्विकाराहेयरागविवर्जिताः॥ सर्वे हिरण्मयाः कोटिसूर्यसमप्रभाः सर्वे देवमयादि
व्याः कामक्रोधादिवर्जिताः॥ नारायणपदांभोजभक्त्येकरससेविताः॥ निरंतरं सामगानपरि
पूर्णसुखं श्रिताः॥ सर्वे पंचोपनिषत्स्वरूपा वेदवर्चसः तेजस्विनः॥ इति अत्र त्रिपाद्विभूति

नामयुक्ता

१२

(२८)

शब्देन प्रपंचातीतलोको निर्दिश्यते पादविभूतिशब्देन तु प्रपंच इति ॥ यथा तत्रैव ॥ त्रिपाद्विभूति
ः परं धाम त्रिपादोऽस्येहाभवत्पुनः त्रिपाद्विभूतिर्नित्या स्यादनित्यं पादमैश्वरं नित्यं तद्रूपमीशस्य
॥ परं धाम्नि स्थितं शुभं अच्युतं शाश्वतं दिव्यं ॥ सदा यौवनमाश्रितं नित्यं संभोगयमैश्वर्यश्रिया
न्मस्या च संवृतमिति ॥ श्रीनारदपंचरात्रे ब्रह्मनारदसंवादे जितंते स्तोत्रे ॥ लोकं वैकुंठनामानं
दिव्यषड्गुणसंयुतं ॥ अवैष्णवानामप्राप्यं गुणत्रयविवर्जितं ॥ नित्यसिद्धैः समाकीर्णं तन्मयैः पां
चकालिकैः ॥ सभाप्रासादसंयुक्तं ॥ वनैश्चोपवनैः शुभं वापीकूपतडागैश्च वृक्षखंडैः ॥ सुमंडि
तं ॥ अप्राकृतं सुरैर्वंद्यमयुतार्कसमप्रभमिति ॥ अत्रास्य लोकस्याप्राकृतत्वोक्त्या सभाप्रासादादि
वर्णनेन च सर्वे पंचोपनिषत्स्वरूपा इति प्राप्तोक्त्या चाप्राकृताचिदनुभाव्यावितत्वं ज्ञेयं
तथा च पंचोपनिषत्प्रधानपंचाक्षरवाच्याप्राकृतद्रव्यारब्धत्वं सर्वस्य ज्ञेयं ॥ स्कंदे श्रीम

प

गे

(27)

१४

नत्कुमारमार्कंडेयसंवादे ॥ यो विष्णुभक्तो विप्रेंद्रः शंखचक्रादिचिह्नितः स याति विष्णुलोकं वै
दाहप्रलयवर्जितमिति ॥ अत्र धामादिशब्दैः स्थानवाचकत्वमप्यात्मस्वरूपमात्रगोचरत्वमा
ख्यायां प्रमाणाभावः ॥ अत्रैव एतत्प्रमाणेन निगच्छंति मस्थानं यद्ब्रह्मपरमं विदुरिति मोक्षादेर्
वस्थानशब्दनिगदश्रवणात् ॥ बृहदारण्यके षष्ठेध्याये ॥ अणुः पंथा वितरः पुराणो मां स्पृष्टो
नुवित्तो मयैव तेन धीरा अपियांति ब्रह्मविदनुक्रम्य स्वर्गलोकमितो विमुक्ता इति ॥ अस्या
र्थः अणुः सूक्ष्मः दुर्ज्ञेयः पंथा मार्गः ॥ आत्मनः वितरः विस्तीर्णः संसारसमुद्रस्य तरणहेतुत्वा
त्तथा पुराणः अनादिपरंपराप्राप्तः मां मुमुक्षुं स्पृष्टः मदंतः मयैव वित्तः साक्षात्कृतः साक्षा
त्कारोपितदवलंबनेन मयैव प्राप्त इत्यर्थः ॥ तेन मार्गेणान्येपि धीराः धीमंतः ब्रह्मविदः यं
तः इतः शरीरानुक्रम्य विमुक्ताः ॥ विशेषेण संसारान्मुक्ताः संतः स्वर्गं यन्न दुःखेन संभिन्नं

६ १४

२९

नचगत्स्समनंतरं ॥ अनिलाषोपपन्नंच सुखं स्वर्गपदास्पदं मिमुक्तानंदरूपं लोकं वैकुं
ठाख्यं याति ॥ यथाहं तथाते पियांतीति ॥ तथा तथैवागतस्मिंछुक्लमुतनीलमाहुः पिंगलं
हरितं लोहितं च एष पंथा ब्रह्मणा हानुवित्तस्तेनैवैति ब्रह्मवित्तैजसः पुण्यकृच्चेति तस्मिन्
लोके शुक्लं श्वेतरूपं स्फटिकरजतेंद्रादिसमानं तादृशैः ॥ प्रासादैः स्त्रीपुंसशरीरैश्च यत्परि
च्छेदरूपलक्षितं शुद्धसत्वप्रधानानंदसंदोहं ॥ उतपक्षांतरे ॥ नीलं कृष्णांजनाभं ॥ आत्मनो
रूपं वस्त्रं तराणां वा पिंगलमित्यादि पूर्ववत् ॥ एष पंथा ब्रह्मणा ईश्वरेणैव ह प्रसिद्धोऽनु
वित्तः ज्ञातः तेन यथा ब्रह्मवित् ॥ ब्रह्मज्ञः सन् तैजसः परमं ज्योमहत्तेज इत्युक्तेस्तेजः श
ब्देन भगवान् तदीयः प्रपन्न इति यावत् पुण्यकृच्चोपासनाजनितभक्तिलक्षणपुण्य
वांश्च एति यं लोकं प्राप्नोतीत्यर्थः ॥ तस्माद्भवंतमनवद्यमनंतपारं सर्वज्ञमीश्वरमकुं

२५ श्री

ठविकुंठधि[illegible]मित्येकादशोन्नातपत्रं तु वैकुंठमिति द्वादशो प्रपंचातीतलोकापि नित्यत्वं
ग्रीवायोजनलोकस्य महर्लोकिस्तनद्वयात्। मूर्द्ध्नि सत्यलोकस्य ब्रह्मलोकं सनातन
इति ब्रह्मलोको वैकुंठाख्यः सनातनः न च सत्य प्रपंचांतर्वर्त्तीत्यर्थः प्रपंचपूर्वकालमेव
ब्रह्मणे वैकुंठस्य प्रदर्शनात्। तदुक्तं द्वितीये। तस्मै स्वलोकं भगवान्सभाजितः संदर्शयामा
स परं न यत्परं। व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतं। प्रवर्त्तते यत्र र
जस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरा
सुरार्चिता इत्यादि श्रुतिश्च तद्विष्णोः परमं पदं सदा पश्यंति सूरय इति। एवं श्रीवैकुंठस्य
नित्यत्वा प्राकृतत्वचैतन्यरूपसिद्धे श्रीजगद्विग्रहस्येवाचिंत्यशक्त्या नानारूपत्वमप्यप्य
विरुद्धं महावैकुंठस्य स्थानं चोक्तं पाद्मोत्तरखंडे श्रीशिवेन प्रधानपरमव्योम्नोरंतरे विर

२५

३०

जानदीतस्याः पारेपरंव्योमन्त्रिपाद्भूतंसनातनमित्यादिएवमादिगुणोपेतंतद्विष्णोःपरमं
पदमि [illegible] त्यस्मेपिवैकुंठावङ्कधाः प्रपंचांतर्गतान्यपियंतियेपिहिरण्यगर्भप्रभृतीना
मपिगमनागमनादिकंवर्ण्यते॥ यद्गत्वा ननिवर्त्तंतेतद्धामपरमंहरेरित्युक्तत्वात्तु परमप
दादन्यएवतदंतरान्तताश्रेयाः [illegible] वैकुंठकल्पितायेनलोकौनमस्कृतः॥ रमया [illegible] र्थ्यमाने
नदेव्यातत्प्रियकाम्ययेतियोनिरुक्तयथाभगवतः प्रपंचेऽस्याविर्भाव [illegible] मात्रंजन्मन्नजा
यमानोवहुधाविजायतेतस्यधीराः परिजानंतियोनिमितिश्रुतेर्जन्मकर्मचमे [illegible] दि
व्यमित्यादिस्मृतेश्चतथैववैकुंठस्यापिकल्पनमेवनतुप्राकृतवत्कृत्रिमत्वं॥ उत्तयत्रापि
नित्यत्वात् विकुंठस्यतस्यैवेदं वैकुंठं॥ न्तर्वैकुंठंतु॥ सृष्टेःप्रागेवब्रह्मणाद्दृष्टमितितद्दे
वंपरमपदंनित्यत्वंसाधितंश्रीमन्नूलीलासमेतत्वंचपार्थैसामान्याविष्णुतेहरेःस्वंतस्मिन्

प्र

लोके

१६

शाश्वते पदे ॥ तस्य तु ॥ जागरूके स्मिन् युवानौ श्रीसनातनौ यतः स्वमारौ ॥ युवती स्थली ले
विष्णुवक्षःस्थे इति सामान्ये साधारणे ॥ आसमंताद्धि युते वियुक्ते तैर हिते दुःस्पर्शः ॥ अंते अपे
चाद्वहिर्मते अस्मिन् स्थले स्फुते दुःस्पर्शः पंचरात्रे मितं ते स्तोत्रे च ॥ क्रीडंते रमया सार्धं लीलान्
मिषु केशवं मे यस्या मं विशालाक्षं कदाचन स्पृश मिव स्तुषेति ॥ अत्र श्रियो नित्यां विनाभावयं
बंधप्रमाणानि ॥ अनपायनी भगवती या ॥ साक्षादात्मनो हरेरिति ॥ अनपायिलं हयशीर्षपं
चरात्रे परमात्मा हरिर्देवस्तच्छक्तिं श्रीरिहोदिता श्रीदेवी प्रकृतिप्रोक्ता केशवः पुरुष
स्मृतः न विष्णुना विना देवी न हरिः पद्मजां विनेति स्मृतिश्च ॥ श्रीश्च ते लक्ष्मीश्च पत्न्यौ ।
अहोरात्रे पार्श्वे इति ॥ गंधद्वारां दुराधर्षामिति ॥ यं कामं कामये तं तमुग्रं कृणोमि तं ब्रह्मा
णं तमृषिं तं सुमेधां अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे सर्वे हंतवा उ अहं जनाय समदं कृ ।

रि

पशुपतिं सृजामि

१६

णो महद्द्यावापृथिवी आविवेश अहं सुवे पितरमस्य मूर्द्धन्मम योनिरप्स्वन्तः ॥ समुद्र इ
ति ॥ अस्येशाना जगतो विष्णुपत्नीति श्रियवचनात् ॥ अमृतत्वमापन्नित्यादि श्रुतिजातं त
न्माहात्म्यप्रकाशकमनुसंधेयं ॥ विष्णुपुराणे नित्यैवसा जगन्माता विष्णोः श्रीरनपायिनी
॥ यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम इति ॥ तत्रैव एवं यथा जगत्स्वामी देवत्वे देवदेहेयं
हा मनुष्यत्वे च मानुषी विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनूमित्यनेन व्रजमंडले श्रीराधा
रूपेण द्वारकादिषु सैव श्रीरुक्मिण्यादिरूपेणानुसरतीति एकधा बहुधा चैव शतधा च
सहस्रधा ॥ अनंतधा स्वसंकल्पादात्र किंकर विग्रहेत्यादेः वाराणस्यां विग्रहेत्यादेः वाराण
स्यां विशालाक्षी विमला पुरुषोत्तमे रुक्मिणी द्वारकायां तु राधा वृंदावने वने इत्यादिकं तु पू
र्वोक्तिव हिरंगशक्तिद्वयस्य वाराणस्यादिद्वये धिकार उत्तरार्द्धोक्तशक्तिद्वयस्य द्वारकादि

१७ ई

द्वयेधिकारइत्येतत्परं ज्ञेयं॥ वृंदावनाधिपत्यं तु दत्तं तस्यै प्रतुष्यता॥ रूक्मिनाम्नत्र देवी तु राधा वृंदावने वनेतिपाद्मोक्तेः अन्यत्र देवी विशालाक्षी विमलादिकाधिकारिणी वृंदावने तु साक्षाद्राधिकैवाधिकारिण्यर्थः राधायालक्ष्मीत्वं बृहद्गौतमीये दृष्टव्यं यथा देवस्य मूर्त्तिलावण्यपीतवस्त्रादिभूषितां॥ देवस्यार्द्धे रूपेण तस्य हेमसमप्रभां रक्तवस्त्रपरीधानां रक्तालंकारालंकृतां॥ श्रीराधां वामभागे तु पूजयेद्भक्तितत्परः॥ लक्ष्मीत्र एवमुच्चार्य राधिकायेनमो लिखेत्॥ राधिकामनुराख्यातश्चतुर्दशाकलावहः चतुर्मुखऋषिश्चास्य गायत्री छंद ईरितं॥ देवी रुक्ममयी प्रोक्ता राधिका परदेवता॥ सुरूपा द्विभुजा चित्रवसनाभरणान्विता पुरुषः रूक्मः सर्वात्मसा शक्तिः॥ सर्वदेवतावरा न्नयकरास्येया सेविता सर्वदेवैः सर्वलक्ष्मीमयी सर्वकांतिः संमोहिनी परेति पाद्मकार्त्तिकमाहात्म्ये यथा राधा प्रिया विष्णोस्तस्याः कुंडं प्रि

१७

(३५)

यं तथा ॥ सर्वगोपीषु सैवैका विष्णोरत्यंतवल्लभेत्यनेन तस्याः लक्ष्मीत्वमेवेति निश्चीयते तस्मा
दनेन श्रीगोपीनिश्वासपिच्छिप्यचिह्नेन श्रीरासविहारिता निरवस्थयैकस्याः पदानीत्यादिनाव
र्णितसौभाग्यपातिस्या श्रीराधैव जन्नेवेत् ॥ अतस्तन्नामैव तां सूचयामासुः ॥ अनयाराधितो नूनं ॥
भगवान्हरिरीश्वरः ॥ यन्नो विहाय गोविंदं प्रीतो यामनयद्रहः ॥ अनया श्रीराधया भगवान्नाधि
तः साधितो वशीकृत इत्यर्थः नूनमिति वितर्के ॥ यतश्च राधयतीति निरुक्त्या तस्या राधेति संज्ञा
पि ज्ञातेति भावः राधितत्वे तु हेतुं यन्न इत्यादि रुक्मिण्या रमयोपेतं दृष्ट्वा कृष्णं श्रियःपतिमि
त्यादि दशमोक्तेः राघवत्वे भवत्सीता रुक्मिणी कृष्णजन्मनीति विष्णुपुराणोक्तेश्च रुक्मिण्या
श्च लक्ष्मीत्वं निर्विवादसिद्धमेव तृतीये ॥ एष प्रश्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृही
तगुणावतार इत्यादि ॥ तस्मा एव रूपांतरं न्नूलीला शब्दवाच्यं तदेवं श्रीन्नूलीलासमेतत्वं सा

धितं लीलाविसृतेब्रह्मांडकोटीनामपि स एक एव सर्वेश्वरः ॥ एकमेवाद्वितीयं ब्रह्मेति प
तिं विश्वस्यात्मेश्वरमित्यादिश्रुतेः एवं ब्रह्मणः परत्वं साधयित्वा तदवस्थाभेदमाह ॥ अंतर्या
मी बहिर्यामी द्विविधो भगवान् परः ॥ अंतर्यामित्वमंतःस्थित्वा प्रेरकत्वं स एष त आत्मांतर्याम्यमृत
इत्यादिश्रुतेः ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठतीत्यादिस्मृतेश्च ॥ सर्वांतर्यामी उपासकानां
सविग्रहं प्रतिभाति यथा प्रह्लादस्य प्रतिभानमुक्तं दितिं प्रति कश्यपेन ॥ अंतर्बहिश्चामलम
ब्जनेत्रं ॥ स्वपूरुषेच्छानुगृहीतरूपं पौत्रस्तव श्रीललनाललामं द्रष्टास्फुरत्कुंडलमंडितानन
मिति तृतीयस्कंधे ॥ अन्येषां तु चिन्मात्ररूपेणापि प्रतिभाति बहिर्यामित्वं बहिःस्थित्वा निया
मकत्वं यथावतारादिषु प्रसिद्धमेव ॥ अंतर्यामिद्वैविध्यमाह ॥ चिदचिद्भेदपूर्वत्वादंतर्यामी द्विधा
मतः चिदंतर्यामी अचिदंतर्यामीति द्विधेत्यर्थः स्पष्टमेवैतत् चिदचितोस्तत्संकल्पानुसारिप्र

१८

वृत्तिमत्वात्॥ बहिर्यामि द्वे विध्यमाह बहिर्यामी नित्यलीलाविभूतिनिलयो द्विधा नित्यवि
भूतिनिलयो लीलाविभूतिनिलयश्चेति द्वि[illegible]धेत्यर्थः नित्यविभूतिनिलयत्वं सप्रमाणं श्रु
त्युक्तमेव॥ लीलाविभूतिनिलयभेदमाह लीलाविभूतिनिलयो व्यूहश्चैवावतारकः व्यूहश्चा
वतारश्चेति द्वि[illegible]धेत्यर्थः॥ तत्र व्यूहो नाम सृष्ट्यादिमात्रसंपादकगुणद्वयमात्रव्यंजकश्री
विग्रहवान्॥ आदिपदेन वेदेतिहासादिप्रदानमपि ज्ञेयं तदुक्तं पाद्मोत्तरखंडे॥ स एवाव्यक्त
रूपः सन्व्याप्य षात्मस्ववस्थितः सर्गस्थितिलये ब्रह्मस्वयमेव प्रवर्त्तते॥ षाड्गुण्यपरिपूर्णो
यो वासुदेवः सनातनः त्रिधाकृत्वात्मनो रूपं चतुर्द्धा कुरुते जगत् प्रद्युम्नमनिरुद्धं भगवान्धर्मै
श्वर्यसमन्वितः विधेः प्रजापतीनां च कालस्य च जगतस्य च अंतर्यामित्वमापन्नः सर्गसमष्टकृ
रोतिहि॥ सेतिहासांस्ततो वेदान्ददौ तस्मै महात्मने प्रद्युम्नस्यांशभागो यो ब्रह्मा लोकपिता

(37)

१९

महं उ गत्सर्गं तत्सर्वमकरोत्सख्य यत्संप्रत्यवं अनिरुद्धं भगवान् शक्तितेजःसमन्वितः मनूनां पार्थि
वानां च कालस्य च जनस्य च स्थितिं करोति भगवान् तर्यामित्वमास्थितः संकर्षणो महाविष्णु
र्विद्याबलसमन्वितः कालस्य सर्वभूतानां रुद्रस्य च यमस्य च। अंतर्यामित्वमास्थाय जगत्संह
रते प्रभुरिति। अत्रांतर्यामित्वं प्रेरकत्वमात्रं ज्ञेयं। वासुदेवादीनां स्थानविशेषश्रवणात्। अ
वतारस्तु स्वसंकल्पपूर्वकपराधीनमङ्गीकृत विग्रहयोः लक्ष्मीसौशील्यादिगुणोल्बणः। अवता
रस्य द्वैविध्यमाह। अवतारो हि विभवस्तथैवार्चावतारक। इति द्विधेति शेषः। तत्र विभवावता
रः गमनागमनसंश्लेष विश्लेषादियोग्यं यथा भवति तथा दिव्यविग्रहं प्रकटयन् स्थितः संचो
पेंद्ररामकृष्णादिः। विभवद्वैविध्यमाह। स्वरूपावेशभेदेन विभवोपि द्विधामतः। स्वरूपावता
रश्चावेशावतार इति द्विधेत्यर्थः। स्वरूपावतारो नाम सर्वेश्वरः स्वयमेव स्वकीयाप्राकृतदि

१९

स्वविग्रहमितरसजातीयतया प्रकटयन् स्थितः॥ स्वरूपावतारं भेदमाह॥ स्वरूपेणापि म-
नुजामनुजत्वेन हि द्विधा॥ स्वरूपेणापि यो वतारः॥ स मनुजत्वामनुजत्वेन द्विविध इत्यर्थः॥ तत्र म-
नुजो रामकृष्णादिनराकृतिः परं ब्रह्म गूढं परं ब्रह्म मनुष्यलिंगमित्यादिप्रमाणादि॥ अम-
नुजस्तु अतिरिक्तदेवतिर्यगादिरूपरूपं मत्स्यकूर्मादि प्रसिद्ध एव॥ आवेशावतारः॥ के-
षु चिच्चेतनेषु स्वेन वा शक्त्या वा संनिधीभूय स्थितः॥ आवेशावतारं द्विविधमाह॥ आवे-
शोपि स्वरूपेण शक्त्या चैव द्विधा भवेत्॥ स्वरूपावेशावतारं शक्त्यावेशावतारश्चेति द्विवि-
ध इत्यर्थः॥ तत्र स्वरूपावेशावतारः॥ कपिलपरशुरामादिषु॥ शक्त्यावेशावतारस्तु ब्रह्मरु-
द्रादिषु कककुत्स्थपृथुमुचुकुंदादिष्वपि ज्ञेयः स्वशक्तिलेशादजन्मतसर्गाद् इति श्रीविष्णुपु-
राणात्॥ अर्चावतारो नामार्चकपराधीनाखिलात्मस्थितिः॥ अर्चावतारं भेदमाह॥ अर्चा

वतारो द्विविधो ग्राम्यो गृहार्चा स्थायतनार्चेति द्विधेत्यर्थः ॥ तत्र गृहार्चा गृहस्थैर्गृहे पूज्यत्वेन
स्थापितां सुरूपां प्रतिमां बिम्बां प्रसन्नवदनेक्षणां कृत्वात्मनः ॥ प्रीतिकरीं सुवर्णरजतादिनि
ः ॥ तामर्चयेत्तां प्रणमेत्तां ध्यायेन्नान्यमानस इति प्रामाण्यात् ॥ स चाश्रितसुलभः सन् सुवर्णरज
तादिनिर्मितदिव्यविग्रहे प्राकृतदिव्यविग्रहवत्सन्निधिं प्रकटयन्नर्चकाधीनगतिः स्नापित
भोजनादिषु स्थितः सन् तिष्ठतीत्यर्चावतारस्वभावः ॥ आयतनार्चावतारो नाम दिव्यायतने
षु पंचवेरप्रकारेण संनिधिं कृत्वा स्थितः ॥ स च द्विविधः ॥ स्वयंव्यक्तस्थापितभेदात् ॥ एतत्स
र्वमभिप्रेत्योक्तं ब्रह्मांडपुराणे श्रीरंगमाहात्म्ये श्रीभगवद्वाक्यं ॥ अर्चा चतुर्विधा ब्रह्मन्नागमेषु सम
रिता ॥ दिव्यं सैद्धं स्वयंव्यक्तं मानुषं चेति विद्यते ॥ कृत्रिमं त्रितयं तत्र स्वयंव्यक्तमकृत्रिमं ॥ आ
द्यं स्वयंव्यक्तमिदं विमानं रंगसंज्ञितं ॥ श्रीमुष्णं वेंकटाद्रिं च शालग्रामं च नैमिषं ॥ तोताद्रिं पुष्क

रंचैवनरनारायणाश्रमं ॥ अष्टौमेमूर्त्तयःसंतिस्वयंव्यक्तामहीतले ॥ जेयंमानसेतेब्रह्मन्
ध्वराग्नेःसुसंमिते ॥ अहमाविर्भविष्यामिवरदःसर्वदेहिनामिति ॥ तथाचपाद्मोत्तरखंडे
॥ रुद्रउवाच ॥ शृणुदेविप्रवक्ष्यामितद्धामावस्थितैर्हरेः ॥ स्थापनंचस्वयंव्यक्तंद्विविधंत
त्रकीर्तितं ॥ शिलामृद्दारुलोहाद्यैःकृत्वाप्रतिकृतिंहरेः ॥ श्रौतस्मार्तागमप्रोक्तंक्रिययास्था
पनेहियत् ॥ तत्स्थापनमितिप्रोक्तंस्वयंव्यक्तंहिमेशृणु ॥ यस्मिन्नंसंनिहितोप्रभुःस्वयमेवन वि
णांनुवि ॥ पाषाणदार्वैरात्मेशःस्वयंव्यक्तंहितत्स्मृतं ॥ स्वयंव्यक्तेस्थापनेवापूजयेन्मधुसू
दनं ॥ देवतानांमहर्षीणामर्चनार्थंसनातनःस्वयमेवजगन्नाथःसंनिधिंयातिकेशवः ॥ य
स्मयद्विग्रहेह्यात्रयंतदेवाविरभूत्तुवितद्वपूजयेन्नित्यंतस्मिन्नेवरमेत्सदा ॥ श्रीरंगशा
२ यीदेवेशोविधेश्चापुराप्रभुः ॥ सएवेक्ष्वाकुनाथानांतपसाविरभूद्विभुः ॥ ममापिकार्यंसंप्र

ज्यो माधवं कल्मषापहः॥ यत्र यत्र हरेरर्चा स्वयंव्यक्ताणुमानने॥ तत्र तत्र समागम्य रमेहं संव्य
वस्थितः॥ नाष्टांगायोगैर्यज्ञैश्चाप्यर्चायां विंदते नरः॥ चक्षुषो विषयं प्राप्य ददाति फलमीप्सि
तं॥ सर्वावस्थासु सौलभ्यमर्चायां लभ्यते जनैः॥ अन्यतानामपि सं॥ निधं सर्वपापः पृथिवीतले
॥ जंबूद्वीपे महापुण्ये पवर्षे वैभारते शुभे॥ अर्चायां संनिधौ विष्णुर्नेतरेषु कदाचन॥ तस्माद्दे
भारतं वर्षमुनिभिस्त्रिदशैरपि॥ सेवितं सततं सुकृतपोयज्ञक्रियादिभिः॥ भारतेस्मिन्म
हावर्षे नित्यं संनिहितो हरिः इंद्रद्युम्ने तथा कोर्मे सिंहाद्रौ वदरीवने॥ काश्यां प्रयागे सो
म्ये च शालग्रामाचले तथा॥ द्वारवत्यां नैमिषे च तथा वदरिकाश्रमे॥ हस्तशैले पापहायां पौंड
रीके च दंडके माथुरे वेंकटाद्रौ च श्वेताद्रौ गरुडाचले कांच्यामनंतशायने श्रीरंगे वासवाच
ले॥ नारायणाचले सौम्ये वाराहे वामनाचले॥ एवमाद्याः स्वयंव्यक्ताः सर्वकामफलप्रदाः

स्वयमेव हि यां निधाय यस्मिन्याति जनार्दनः ॥ तस्मिन्नेव स्वयं व्यक्तं वदंति मुनयः श्रुताः ॥ महा
भागवतश्रेष्ठो विधिनास्थाप्य केशवं ॥ मंत्रेण कुर्यात्स्वां निधाय स्थापनं तद्विशिष्यते ॥ तस्मिन्न
पूजयेद्देवं ॥ ग्रामेषु च गृहेषु च शालग्रामशिलायां तु महाचार्यसन्निरूप्यत इति किंच श्रुत्यफ
भोक्तृत्वमप्यत्र प्रसक्तं तोपि स्कृसादिनाचावगम्यते श्रुतिश्च ऋग्वेदे द्वैयाष्टके तृतीयाध्या ती
ये ॥ तस्यैतदाहुः ॥ यः पिप्पलं स्वाद्वत्ति तन्नोन्नशद्यः पितरं न वेदेति श्रुत्यर्थश्च ॥ स्वादु पिप्पलं श्रुत्वा क
र्मफलं भुंक्ते तस्य इत ॥ तस्यैवाहुः यः पितरं ईश्वरं न वेद ॥ स तन्नोन्नशत् नाश्नुते लभ्यर्थः ॥ पत्रं पुष्पं
फलमित्यादिश्च अन्नमन्नमहमित्यादौ च जीवनभूतान्नानि निषेधोऽत्र ज्ञेयः ॥ श्रीत्वात्तु श्रुत्यास्मि प्रय
तात्मन रसादि सार्थकं ज्ञेयं ॥ उपसंहरति ॥ एवं हि चिदचिद्ब्रह्मस्वरूपं समुदीरितं ॥ इति
श्री विवेकत्रयरत्ने श्रीरामानुजदासकृते स्वरूपविवेको नाम प्रथमं परिच्छेदः ॥ १ ॥ ॥ छ ॥

53

अथोपायविवेकः॥ उपायो द्विविधः साध्यसिद्धभेदेन संमतः॥ साध्योपायः कर्मयोगो ज्ञानं भ
क्तिरिति त्रिधा॥१॥ स्पष्टार्थमेतत्. तदुक्तमेकादशे॥ योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विवित्स
या॥ ज्ञानं कर्म च भक्तिश्च नोपायोन्योस्ति कर्हिचित्॥ अत्रोपायांतरनिषेधस्तु साध्योपायापेक्ष
या॥ सिद्धोपायस्य स्वस्य मुख्यत्वादेव वक्ष्यते च॥ स्वस्याप्युपायत्वं ज्ञानकर्मणोस्त्वादिना कर्मयो
गो द्विधा॥ तत्र काम्याकाम्यप्रभेदतः॥ तत्र सकामानां काम्यं कर्मफलसाधनं॥ तदुक्तं तत्रैव ते
ष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनामिति॥ तदपि यस्य यस्य स्वाधिकारानुसारेण भक्ति
मिश्रितं तत्तथैव फलसाधनमिति॥ तथा च तत्र मार्गीयभक्तिषु त्रयानुभेदो वगंतव्यः॥ तत्र
काम्ये तु यथा नृगवृत्तांते॥ ब्रह्मण्यस्य वदान्यस्य तव दासस्य केशव॥ स्मृतिर्नाद्यापि विध्वं
स्तान् भवत्संदर्शनार्थिनः॥ तत्पादेव देव जगन्नाथ गोविंद पुरुषोत्तम॥ नारायण हृषीके

२२

श्रापु एषश्लोकाच्युताव्यय॥ अनुजानीहि मां देव यांतं देवगतिं विभो इत्यादिनाकृतकी
र्त्तनस्यापि तस्य स्वर्गगतिरेवोक्ता॥ अतः सेयं नक्तिः कर्ममार्गीयत्वात्कृषिवद्व्रौ किंकि
व॥ शौचार्थि गंगास्पर्शवन्मलनिवृत्तिमात्रोपदर्शी णवाक्य चिह्न अजामिलस्य तु नामात्रा
सरूपापि सद्यः सर्वाघ क्षयद्वारा तमुपायनामार्गे प्रवर्त्तितमार्गोपासती सालोक्यपा
धिकैव वन्नूवेति॥ अकामस्तु सत्वशोधनद्वारा ज्ञानोपाय एव॥ कर्मणैव हि संसिद्धिमा
स्थिता जनकादयः॥ इति श्रीगीतातः॥ तथा एते वै मैथिला राजन्नात्मविद्याविशारदाः योगे वि
श्वरप्रसादेन द्वंद्वैर्मुक्ता गृहेष्वपीति नवमस्कंधोक्तेः॥ ज्ञानेपि द्वैविध्यमाह॥ केवलात्मैक
विषयं भगवद्विषयं तथा ज्ञानमप्यत्र निर्दिष्टं द्विविधं शास्त्रपारगैः॥ तत्र केवलात्मैकविषयं
॥ जरामरणमोक्षाय मामाश्रित्य यतंति ये यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आ

त्मन्येव च यं तु ष्टस्तस्य कार्यं न विद्यत इत्युक्तानुसारेण निःकामकर्मभक्तिसमुचिताभगा
वनाजनितप्रकृतिविमुक्तात्मज्ञाने ॥ तेन कैवल्यरूपा मुक्तिः भगवद्विषयमपि द्विविधं ऐ
श्वर्यमात्रप्राधान्यरूपं भक्तिप्रवर्तकं च ॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ॥ इति मत्वा
भजंते मां बुधा भावसमन्विता इत्युक्तेः तत्र प्रथमस्य पूर्वोक्तज्ञानेनाप्यत्वमपि भक्तिद्वारा यथो
क्तं ॥ श्रीभागवते ॥ यथा यथात्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणाभिधानैः ॥ तथा तथा
पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तमिति ॥ अत्र सूक्ष्मं वस्तु शुद्धमात्मस्वरूपं ॥ यथो
क्तं नवमे हरिश्चंद्रवृत्तांते ॥ तस्य प्रारंभतिं दृष्ट्वा सभार्यस्य च भूपतेः ॥ विश्वामित्रो भृशं प्रीतो
ददावविहतां गतिं ॥ ज्ञानमित्यर्थः ॥ तामेव गतिमाह ॥ मनः पृथिव्यां तामद्भिस्तेजसापो
निलेन तत् ॥ खे वायुं हृदये तच्च भूतादौ तं महात्मनि ॥ तस्मिन् ज्ञानकलां ध्यात्वा तया

ज्ञानं विनिर्दहन् ॥ हित्वा तां स्वेन भावेन निर्वाणसुखसंविदा ॥ अनिर्देश्यापतर्क्येण तस्यो-

विद्धस्तबंधन इति मनः पृथिव्यां धारयन् ज्ञानकलां ध्यात्वा तयाज्ञानं विनिर्दहन् तां च हि-

त्वा मुक्तः समस्तबंधनस्तस्थाविति अन्वयः ॥ मनोमूलो हि संसारः मनश्चान्नमयं अन्नमयं सौ-

म्यमन इति श्रुतेः ॥ अतोन्नशब्दवाच्यायां पृथिव्यां मनो धारयन्नेकीकुर्वन् ॥ अपस्तेजसा-

नतेजो निलेन तं च भूतादिमहंकारं महात्मनि महतत्वे तस्मिन्विषयाकारं व्याप्य ज्ञान-

कलां ज्ञानांशमात्मत्वेन ध्यात्वा तया ध्यानवृत्तिरूपयात्मावरकाज्ञानं विनिर्दहन् निर्वा-

णसुखसंविदा तां च हित्वा मुक्तबंधनः सन्ननिर्देश्येनाप्रतर्क्येन स्वभावेन स्वस्वरूपेण त-

स्थाविति अर्थः ॥ अनेन तस्य कैवल्यमुक्तिः सूचिता द्वितीयस्य स्वरूपमाह ॥ तत्र मंत्रोपास-

नो स्यावपवर्णस्फुस्थिता तथा ॥ तत्राद्यामंत्रशास्त्रोक्तमंत्रजपपुरश्चरणपूजादिक्रमसं-

त्वा द्वितीयानुभगवच्छ्रवणकीर्त्तनवंदनादिमात्रपरिपाकसंभवा ॥ तत्र पूर्वोक्तमार्ग
स्कन्धभगवन्मंत्राणां मानं त्वादनं तथा तत्र ॥ दानव्रततपोहोमजपस्वाध्यायसंयमैः श्रेयो
भिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥ इति दशमे भक्तियोगफलत्वेन भक्त्यायः पूजये
त मामित्येकादशेपि ॥ पूजादीनां भक्तियोगसाधनत्वमुक्तं ॥ तद्द्वारा सालोक्यादिरूपामुक्ति
र्ज्ञेया ॥ यथैकादशे यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ॥ योगेन दानधर्मेण श्रेयोभि
रितरैरपि ॥ तत्सर्वं भक्तियोगेन मद्भक्तो लभतेंजसा ॥ स्वर्गापवर्गमद्धामकथंचिद्यदि वांछति
त्यत्र कथंचिदित्यनेन कर्ममार्गीयज्ञानमार्गीयोपासनामार्गीयभक्तियोगेषु प्रकारभेदाः
सूचिताः ॥ तत्रोत्तममार्गीयेमद्धामेत्युक्तेः सालोक्यादिकमेव फलत्वेनावगम्यते ॥ तथा त्रिलो
क्यां गतयः सर्वाः कर्मणां त्रिगुणात्मनां योगस्य तपसश्चैव न्यासस्य गतयोमलाः ॥ मह

र्जनस्तपःसत्यसंज्ञभक्तियोगस्यमहद्गतिरित्यत्रमहद्गतिर्वैकुंठलोकइतिव्याख्यातत्वात्साम्
लोक्यसार्ष्टीसादिपद्येषुस्तुद्भक्तानांतत्राप्यनिष्ठाश्रवणाद्धौपासनामार्गीयभक्तियोग
स्यैववैकुंठलोकादिकंफलमितिनिश्चीयते ॥ महद्गतिश्रवणाच्चतन्मार्गावांतरभेदेन
सालोक्यसारूप्यसामीप्यसार्ष्टिसायुज्यानिज्ञेयानि ॥ एषांसर्वेषामपिमहत्त्वंधिगति
त्वात् ॥ तत्रसालोक्यसार्ष्टिसारूप्येषुप्रायोंतःकरणएवभगव त्साक्षात्कारःसामीप्ये
प्रायोवहिर्भगवत्साक्षात्कारःभगवद्विग्रहप्रवेशलक्षणेसायुज्येचांतरेवेतिगम्यते ॥
अतएवदीयमानंनगृह्णंतीत्यादिकंसंगच्छतेसर्वथातत्साक्षात्कारानंदजनितप्रीतिनि
रूपितसेवन सुखाभावात् ॥ यद्यपिसालोक्यादिसाधकानामपिनप्रीतिंविनातत्रसि
द्धिस्तथापितेषांभावस्यदुःखहानौ सामीप्यादिलक्षणसंपन्नावपितासर्यं ॥ ननु

२५

भगवत्सेवेति न्यूनतेति तथोच्यते ॥ तत्र कर्दमविश्वरूपध्रुवादय उपासकास्ते यथाः अजामि
लश्च ॥ तत्र कर्दमो यथा येन स्वधर्मनिरतस्य समाधियोगविद्यात्मयोगविजितान्भगवत्प
पादाः ॥ तानेव ते मदनुसेवनयावरुद्धान्दृष्टिं प्रपश्य वितराम्यभयानशोकानित्युक्तत्वा
त् ॥ तथा मनो ब्रह्मणि युंजानो यत्तत्सदसतः परमित्यारभ्य मध्ये च लब्ध्वात्मा मुक्तबंधन इ
त्युक्ता सर्वांते भगवद्भक्तियोगेन प्राप्तो भागवतीं गतिमित्युक्तेः सालोक्यादिकमेवेति ज्ञा
यते ॥ विश्वरूपस्यापि नारायणवर्ममंत्रयोगः प्रसिद्धमेव ध्रुवस्याप्युपासना चतुर्थे प्रसि
द्धा ॥ अजामिलस्यापि यथा षष्ठे ॥ स तस्मिन्देवसदन आसीनो योगमास्थितः प्रत्याहृतेंद्रि
यग्रामो युयोज मन आत्मनि ॥ यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः उपलभ्योपल
ब्धान्प्राक्ववंदे शिरसा द्विजः हित्वा कलेवरं तीर्थे गंगायां दर्शनादनु सद्यः स्वरूपं जगृ

२५

हेऽनघा वाम्या मर्ध्ववर्त्तिनां ॥ साकं विहायसा विप्रो महापुरुषकिंकरैः हैमं विमानमारु
ह्य ययौ यत्र श्रियः पतिः रिति अत्रास्य श्रीमद्भगवन्नामकीर्त्तनाभासमात्रमहिम्नैव स
द्यः सर्वपापक्षयपूर्वकतथाविधोपासनाप्रवृत्तिस्तज्जनितानुरागो पि ज्ञेयः एवंव्रतः स्व
प्रियनामकीर्त्याजातानुरागो द्रुतचित्त उच्चैर्हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्य
ति लोकवाह्यः अवशेनापि यन्नाम्नि कीर्त्तिते सर्वपातकैः पुमान् विमुच्यते सद्यः सिंह त्र
स्तैर्मृगैरिव सर्वेषामप्यघवतामिदमेव सुनिष्कृतं नाम व्याहरणं विष्णोर्यतस्तद्विषया
मतिरित्यादिप्रामाण्यात् ॥ अत्र सालोक्यादिवांछारहित्वं च तस्मै नमो मोक्षकाम्यायेयत्रा
स्तु हरिरीश्वरः ॥ यद्गत्वा न निवर्त्तन्ते शांताः सन्न्यासिनो मलाद् इति हिरण्यकशिपूपद्रुत
देवैरुक्तं मत्स्येव ॥ यावती ते च सालोक्यादिचतुष्टयेनेच्छंति सेवया पूर्णा कुतोऽन्यत्काल

विस्तृतमित्यत्रान्यस्यैवकालविकृतत्वोक्तेःपाशिकादीनांनतथात्वमितिगम्यतेऽ
न्यच्चनिःकामस्योपासनामार्गस्यसांगानुष्ठितस्यचिरेणमुक्तिजनकत्वंजन्मांतरसह
स्रेषुतपोध्याननसमाधिभिः॥नराणांक्षीणपापानांकृष्णेभक्तिःप्रजायते॥अनेकजन्म
संसिद्धस्ततोयातिपरांगतिमित्यादिप्रमाणसिद्धत्वात्॥सकामस्यतुमंत्रजपादेर्मार
णमोहनवशीकरणोच्चाटनाद्यनर्थफलजनकत्वमस्थिरैश्वर्यादिजनकत्वंचेतिनतथा
त्वं॥तत्साधनप्रकारोपिदुष्करत्वेनमंत्रशास्त्रएवोक्तः॥यथागौतमीयतंत्रे॥पितृमातृवि
शुद्धायेशुद्धाचाराजितेंद्रियाःसंप्रदायेनोपदिष्टास्तेषांसिद्धिर्नवैध्रुवं॥अहर्निशंजपेन्मं
त्रंमंत्रीनियतमानसः॥प्रसहेत्स्नायेच्छय्यामेकाकीनिर्भयःस्वपेत्॥नाधिरोहेतपर्यंकंरक्त
वासोनधारयेत्॥नरक्तचंदनंलिंपेन्नपुष्पंतथाशुधीः॥नैवद्विरशनंकुर्यान्नामिषंचक

क

ले

दाचन ॥ सपत्नपतिन संदेहो गोपवेषधरं हरिमितितथा तंत्रोक्तमंत्राणमपि सिद्धसा
ध्यसुसिद्धरिपुरूपाणां शोधनप्रकारकं वैख्येनानिष्टफलजनकत्वं तत्रैवोक्तं रिपुर्म्म
लनिक्तं ततः ॥ योदद्यादविदित्वैवं मंत्रं सपत्नस्तं तां व्रजेदित्यादि तद्वत्पूर्वमार्गस्य यथोक्ता
नुष्ठानेन भक्तियोगकामानां चिरेण भक्तियोगजनकत्वं तद्वारा सालोक्यादिकं फलमि
ति निर्णीतं द्वितीयमार्गस्तु मामेव नैरपेक्ष्येण भक्तियोगेन विंदति ॥ भक्त्या संयातया भक्त्याय
त्र संकीर्त्तनेनैव सर्वस्वार्थोऽभिलभ्यते ॥ तस्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः श्रोतव्यः
कीर्त्तितव्यश्च स्मर्त्तव्यश्चेच्छताभयं नसाधयति मां योगो न सांख्यं धर्म उद्धव ॥ नस्वाध्यायस्त
पस्त्यागो यथा भक्तिर्ममोर्जिता ॥ त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोथ पतेत्ततो
यदि ॥ यत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः ॥ नदानं नतपो नेज्या

२७

नशौचंनव्रतानिचप्रीयतेमलयाभक्त्याहरिरन्यद्विडंबनमित्यादिः॥ श्रीभगवतोक्ता
॥सर्वधर्मोज्झिताविष्णोर्नाममात्रैकजल्पकाः॥ सुखेनयांगतिंयांतिनतांसर्वेपिधार्मिका
ःइतिपाद्मसहस्रनामस्तोत्रवचनाच्च॥ सुकरत्वात्स्वनिरपेक्षतयाफलसाधकत्वेति
॥स्मृतएवतृतीयेकपिलेननयुज्यमानयाभक्त्याभगवत्यखिलात्मनिसदृशोस्तिशिवःपंथा
योगिनांब्रह्मसिद्धयइत्युपक्रम्यसतांलक्षणमुक्त्वा॥ तएतेसाधवःसाध्विसर्वसंगदोषविव
र्जिताःसंगस्तेष्वथतेकार्यःसंगदोषहराहिते॥ सतांप्रसंगान्ममवीर्यसंविदोभवंतिहृ
त्कर्णरसायनाःकथांतज्जोषणादाश्वपवर्गवर्त्मनिश्रद्धारतिर्भक्तिरनुक्रमिष्यतीत्या
दिनिरूपितंपराशररुक्मांगदचंद्रहासप्रह्लादादयःशुद्धभक्ताज्ञेयाःपराशरस्यमाहा
पे डैनसप्तवार्षिकस्यनिरंतरस्मरणरूपव्रजनाधिक्येनश्रेष्ठत्वमुक्तंवसिष्ठांकगतस्येति

२७

तथाहिभक्तिसुधोदयेभक्तमुनिः॥ममकल्पायुतंब्राह्मंसमाह्निकः॥इत्युक्तवंतंपराश
रंप्रत्युक्तंमार्कंडेयेनयावंतोऽन्हःक्षणायाताहरिस्मृतेस्तैवंदेहिनांएकीकृत्यागतानेवगणनं
कार्यमायुषः॥इत्युक्त्वाएवंयोजीवतिचिरंसर्वंह्योवयसाधिक इत्यादिनातत्सज्जनाधिका
प्रयुक्तज्येष्ठत्वंवंशत्वंस्थापितमितिशुद्धभक्तत्वमवधेयं॥एवंरुक्मांगदादावपितत्तत्स
संग्रामवरणादिनातथात्वंज्ञेयंकिंचश्रीह्वामृतकथायांमेरस्तुपक्कमपएवंधर्मैर्मनुष्याणां
शुद्धवात्मनिवेदिनामपिसंजायतेभक्तिः॥कोमेऽर्थोऽस्यावशिष्यतइत्यनेनशुद्धभक्तेरेवत
त्साधनत्वमुक्तं॥साचभक्तिःश्रवणकीर्तनादिपरिपाकेनपरिपाकोनामनैरंतर्येणक्रि
यमाणस्यतद्धिदशापन्नत्वंयदाङ्गःवेदनंध्यानविश्रांतंकृत्वास्मृतोसाचदृष्टित्वमस्येति
दृष्टिर्भक्तित्वमिच्छतीतिसाचभक्तिःप्रीतिरूपाप्रीतिरणीपायिनीप्रीतिर्नयाविन्मप्रिवासु

२८

देवेन मुच्यते देहयोगेन तावदिति ॥ श्रीकृष्णे षष्ठे देववाक्यात् ॥ तेषां सततयुक्तानां भजतां प्री
तिपूर्वकमिति गीतोक्तेः विष्णुपुराणे च ॥ नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहं ॥ तेषु तेष्व
च्युता भक्तिरच्युतास्तु सदा त्वयि ॥ या प्रीतिरविवेकानां विषयेष्वनपायिनी ॥ त्वामनुस्मर
तः सा मे हृदयान्मापसर्पतु ॥ यायंदृशी सा तादृशीत्यर्थः ॥ कृतकृत्योस्मि भगवन्वरेणानेन
यत्त्वयि भवित्री त्वत्प्रसादेन भक्तिरव्यभिचारिणीति ॥ श्रीभगवद्वाक्यमपि तथैवं यथा ते
निश्चलं चेतो मयि भक्तिसमन्वितं ॥ तथा त्वं मत्प्रसादेन निर्वाणं परमाप्स्यसीति ॥ प्रीतिस्तु
भगवदानुकूल्यात्मक तदनुगततत्स्पृहादिमयज्ञानविशेषः तस्मिन्परमोपादेयत्वज्ञा
माधुर्यज्ञानप्रधाना नं च सा च प्रीतिर्द्विविधा प्रभुताज्ञानप्रधाना चेति माधुर्यं नाम शीलरूपगुणवयो लीला गो
नां सर्वविशेषाणां मनोहरत्वे ॥ तत्राद्या प्रीतिर्यथा ॥ श्रीमदक्रूरस्यैव यादवस्कंधसत्तेष

चेष्टतप्रभोरमूनं घ्निरजोस्महो इति॥ द्वितीया यथा श्रीव्रजसुंदरीणां॥ वीक्ष्यालकावृतमु
खं नवकुंडलश्रीगंडस्थलाधरसुधं हसितावलोकं॥ दत्ताभयं च भुजदंडयुगं विलोक्य वक्ष
:श्रियैकरमणं च भवाम दास्य इति॥ अत्र माधुर्यस्यैव माहात्म्यज्ञानमवगंतव्यं॥ माहात्म्य
ज्ञानपूर्वस्तु स्नेहो भक्तिरिति तल्लक्षणात्॥ सा प्रीतिरधिकारिचेतनविशेषाधिकरणेका
नानारसभेदभिन्ना॥ भगवन्मुखोल्लासमभूतानि नानाविधकैंकर्याण्येवनुज्ञावश्यशाद्धवाख्याति
संपादयंती नानारूपतया समुल्लसतीति॥ तत्र प्रस्तुता ज्ञानप्रधाना गौरवबुद्धिं जनयति मा
धुर्यज्ञानप्रधाना तु नतथेति विशेषः॥ श्रीभागवते द्वितीये॥ श्रीशुकेनाप्युपासकस्तद्व
भक्तप्रपन्नानां भेद उक्तः॥ यथा तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः क्षे
मं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः॥ इत्युपासका उक्ताः यत्कीर्तनं य

स्विनो२

त्स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणं लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्र
श्रवसे नमो नमः ॥ इत्यनेन सुदृक्तां विचक्षणा यच्चरणोपसादनात्संगं व्युदस्योभयतो
न्तरात्मनः विंदंति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे ॥ नमो नमः इत्यनेन सिद्धोपा
यस्वीकारिणः प्रपन्ना उक्ता इति ॥ किंच उपासकप्रपन्नयोस्तु स्मर्तव्यः सततं विष्णुर्विस्म
र्तव्यो न जातुचित् ॥ सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः इत्युक्तेर्नैरंतर्येण स्मरणं वि
धिः ॥ तस्मादहर्निशं विष्णुं संस्मरन्पुरुषो मुने न याति नरकं शुद्धः संक्षीणाखिलकल्म
षः ॥ तथा प्रातर्निशि तथा संध्यामध्याह्नादिषु संस्मरन् ॥ तथा चक्रायुधस्य नामानि सदा
सर्वत्र कीर्तयेदित्यादि ॥ नासातत्यस्य श्रवणात् ॥ तदभावे निषेधो ज्ञेयः प्रपन्नस्य तु आनुकू
ल्यसंकल्प इति विधिः ॥ प्रातिकूल्यस्य वर्जनमिति निषेधः ॥ न तु निरंतरस्मरणाद्याग्रहः

अहं स्मरामि मद्भक्तं नयामि परमां गतिमिति भगवता स्वां कृपालुनैव तस्य परमगति यं
नयनोक्तिरिति साधनांतरत्यागपूर्वकं केवलभगवद्बलवि[illegible]षयानि यानि सकृत्कीर्तनस्म
रणादिविधायकवाक्यानीति ज्ञेयं ॥ तदेवं कर्मज्ञानभक्तियोगाख्यं साध्योपायत्रयमुपम
स्येदानीं सिद्धोपायमाह ॥ सिद्धोपायो हि भगवानाश्रितं सर्वदेहिनामिति आश्रितो भ
गवान्सर्वदेहिनां सिद्धोपायः ॥ तत्र प्रमाणमाह तेषामहं चेति प्रतिज्ञातारूपानिधिः
तेषामहं समुद्धर्तास्मि मृत्युसंसारसागरात् ॥ भवामि न चिरात्पार्थ मय्यावेशितचेतसामि
ति ॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः इति च प्रतिज्ञाप्रमाणांतराण्यपि यथा
ज्ञानेकर्मणि योगे च वात्स्यादंडधारणे ॥ यावानर्थो निर्णातात तावांस्तेहं चतुर्विधः कर्म
ज्ञानभक्तिमार्गप्रवर्तकफलदतया त्रिविधः ॥ स्वैकाश्रितसर्वतया चैकविधः ॥ एवं च

३०

तस्मो विधायस्येति चतुर्विधः चतुः प्रकारः ॥ अतोहमेव सर्वस्यापेक्षणीय इत्यर्थः सर्व
स्वतानोपायोपेयस्वरूपत्वं गतिर्गन्तव्यं प्रभुः साक्षी पोषामहं प्रिय आत्मा वासुदेवः सर्वमि
त्यादिप्रमाणात् अनेन स्वस्य सिद्धोपायत्वमुक्तं ॥ तथा तस्मात्त्वमुरुवोत्सृज्य नोदनां प्रति
नोदनां ॥ याहि सर्वात्मभावेन मां यास्यसकुतोभय इति ॥ अस्यार्थः नोदनां सात्विककर्मवि

फ

धिं प्रतिनोदनां राजसतामसमर्मविधिं प्रवृत्तिं ॥ मंत्रोपासनादिविहितानेककल्पप्रवृत्तिं आ
त्मानात्मविचारात्मज्ञानसाधनभक्त्यादि ॥ श्रोतं मेवचेति साध्योपायाचरणानुकूल

संश्रुत

श्रोतव्यं ॥ श्रुतादिमुत्सृज्य मामेवमेकं सहायांतरनिरपेक्षं शरणं याहि ॥ उपायत्वेन स्वी
कुरु सर्वात्मभावेनानुकूल्यादिषडंगपूर्वकीदृशं मां सर्वदेहिनामात्मानं स्वभावत एव

मै

हितं अतःपरं मंवोपायत्वेनाश्रितेनाकुतोभयः स्याः नन्वतवसाधनांतरं कर्त्तव्यमस्ती

३०

त्स्पर्धः स्कंति स्म ॥ तस्मात् मासमेषां तपसामतिरिक्तमाकुर्वसुरणवो विज्ञुरसि प्राणस्त्वमसि
संधाता ब्रह्मन् त्वमसि विश्वधृक् तेजोदास्त्वमस्यग्नेरसि वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्व
मसि चंद्रमस उपयामगृहीतोसि ब्रह्मणे त्वा महस ओमित्यात्मानं युंजीतैतद्वै महोपनिष
द्देवानां गुह्यं ॥ य एवं ब्रह्मणो महिमानमाप्नोति तस्माद् ब्रह्मणो महिमानमिति ॥ तथा यो ब्र
ह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरण
महं प्रपद्ये इति ब्रह्मवैवर्त्ते जीवन्ति प्रणता देवा उपचारैः पृथग्विधैः ॥ नालमंते परित्रातुं
क्वापि यांति विना हरिं ॥ ~~तस्मात्तमेव शरणं जीवन्ति प्रणता देवानुपचारैः पृथग्विधैः~~ ॥ ना
~~लमंते परित्रातुं क्वापि यांति विना हरिं~~ ॥ तस्मात्तमेव शरणं जीवन्स्वस्थः समाश्रयेत् ॥ स
र्वधर्मस्वरूपोसावेक एव जनार्दन इति ॥ तथा तत्रैव भवसागरमग्नानां दुःखशोकाभिवे

३१

मिनां भक्तिस्नव विहीनानां दृढानौः केशवं प्रभुरिति अनेन भक्तिरेव तदाश्रय इत्यथास्ते
भक्तिस्नव विहीनानां केशवस्य दृढनौकतयोक्तेः ॥ श्रीतोगीसु च ॥ तेषामेवानुकंपार्थमह
मज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ तथा ॥ अनन्याश्चिंतयंतो मां
ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं इति ॥ ईश्वरः सर्वभूतानां
हृद्देशेऽर्जुन तिष्ठति ॥ भ्रामयन् सर्वभूतानि यंत्रारूढानि मायया ॥ तमेव शरणं गच्छ सर्वभा
वेन भारत ॥ तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतमिति ॥ दैवी ह्येषा गुणमयी मम मा
या दुरत्यया मामेव ये प्रपद्यंते मायामेतां तरंति ते इत्यादि ॥ अमत्र यद्विवातादिदोषेण म
सं ज्ञक्तो मां न स्मरेत ॥ अहं स्मरामि मद्भक्तं नयामि परमां गतिमिति भगवत्प्रतिज्ञा च ॥ श्री
मद्रामायणे ॥ सकृदेव प्रपन्नाय तवास्मीति च याचते अभयं सर्वभूतेभ्यो ददाम्येतद्व ३१

तं ममेति ॥ गारुडे ॥ शरणं ते प्रपन्ना ये ध्यानयोगविवर्जिताः ॥ ते वै मृत्युमतिक्रम्य यांति तत्
द्वैष्णवं पदमिति ॥ मोक्षधर्मे ॥ या वै साधनसंपत्तिः पुरुषार्थचतुष्टये ॥ तया विना तदाप्नोति
नरो नारायणाश्रय ॥ इति द्वितीये ॥ अज्ञात एतान्निखिलान्निराश्रयानमतिश्रमेण लोके वि
कुंठरूपेण पश्यति गोकुलं स्मेरसनेन ॥ श्रीगोकुलवासिनां वैकुंठप्राप्तिसाधनाज्ञावेपि भ
गवतैव तत्र नयनात्तस्यैवोपायत्वमुक्तं ॥ श्रीभागवते नवमे च ॥ ये दारागारपुत्राप्तान्प्राणा
न् वित्तमिमं परं ॥ हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥ दशमे च ॥ ये त्यक्तलोकधर्माश्च मां
मदर्थे तान् बिभर्म्यहमिति ॥ तथा गीतासु ॥ मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः स्त्रि
यो वैश्यास्तथा शूद्रास्तेपि यांति परां गतिमिति ॥ अत एव तस्यौर्ध्वदैहिकक्रियाद्यभावेपि
मुक्तिरेव तद्देवं सिद्धोपाये प्रमाणानि निदर्शितानि ॥ अन्यसिद्धोपायस्वीकारो नाम एकां

३२

तिस्वलक्षणसंबंधित्वविशेषः॥ तथोक्तं गारुडे॥ ब्राह्मणानां सहस्रेभ्यः सत्रयाजी विशिष्यते
॥सत्रयाजिसहस्रेभ्यः सर्ववेदांतपारगः॥ सर्ववेदांतवि[illegible]त्कोट्या विष्णुभक्तो विशिष्यते॥
विष्णुभक्तसहस्रेभ्य एकांत्येको विशिष्यते॥ इति ते देवसंबंधपदेनैकोन वोच्यते॥ कामक्रोध
भयस्नेहमैक्यसौहृदमेव चेत्यत्रैकपदेन संबंधत्वोच्यते॥ कामाद्गोप्यो भयात्कंसो द्वेषाच्चै
द्यादयो नृपाः॥ संबंधाद्वृष्णयो यूयं स्नेहाद्भक्त्या [illegible]वयं विभो इत्यत्र संबंधस्यानेकैर्भेदेनावगमा
त्वेन च संबंधपदेन भगवतो मातृपितृपि[illegible]तृव्यादिलक्षण एव विवक्षितः स[illegible]वेदानींतनाम
येष्वप्येवेति वाच्यं तस्यैकं सचैद्यपांडवे[illegible]ष्वपि संभवा[illegible]त्पाल्कंसो द्वेषाच्चैद्यादयः यूयं
स्नेहादिति पृथगुपायनिर्देशानुपपत्तेः॥ तस्मात्संबंधशब्दः परमैकांत्यवाची सच नित्यानां भ
गवद्योगात्स्वाभाविकः॥ इदानींतनानां तु शास्त्रोक्तपंचसंस्कारादिजनितः॥ तथा च पाद्मे

६

३२

त्तरखंडे ॥ तापः पुंड्रं तथा नाम मंत्रो यागश्च पंचमः ॥ अमी ते परमसंस्काराः परमैकांत
हेतवइति ॥ आदिशब्देनांकूरस्तैतौ च अन्येव संस्कृतात्मानो विधिना निहितेन ते यजंति
स्वतन्मयास्त्वां वै वक्तुमूर्त्यैकमूर्तिकमिति तत्र याम्निहितेन ब्रह्माणं प्रसुक्तेन विधिना तेन
पाद्मोत्तरखंड प्रसिद्धवैष्णवधर्मप्रकरणस्य मूर्खजनकल्पितत्वशंका निरस्ता ॥ आग
त गवत्प्रमाणसिद्धत्वात् संस्कृतात्मानः स्वकीयसंबंधिनोपि ते तन्मयाः त्वदेक
प्रधानास्त्वामेव यजंति सेवंते ॥ कथंभूतं त्वां वक्तुमूर्ति नानावतार तया एकमूर्तिं च
मूलस्वरूपेण तादृशस्य व्यापकमंत्राधिकारत्वेन सर्वावतारितिसैकैकर्याधिकारा वतारा
दित्यर्थः ॥ अनेन भगवदुक्तपंचसंस्कारातिरिक्तमुमंतरोक्तागमाद्युक्तदीक्षावि
धानसंस्कृतात्मनां प्रतिनियतावतारमन्त्रेनाधिकारो न तु सर्वावतारसाधारणे

भजनाधिकार इति सूचितं ॥ अत्र शिष्टाचारोपि दृश्यते श्रीवाक्यं ॥ देवदत्तमिमं लब्ध्वा नृलोक
मजितेंद्रियः ॥ यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्मवंचकः ॥ यस्त्वां विसृज्य ते मर्त्य आत्मानं प्रिय नं
मीश्वरं ॥ विपर्यये न्द्रियार्थार्थं विषमत्त्यमृतं त्यजन् ॥ इत्यप्रपन्ने विनिंद्यत्वमहं ब्रह्माथ विबुधा मु
नयश्चामलाशयाः ॥ सर्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरमित्युक्तं ॥ अनेन ब्रह्माद्यादतते
नास्योपायस्यासेवितत्वं च श्वमुक्तं ॥ किंतु ब्रह्मादीनामधिकारि[illegible]त्वेनांतरेवतन्निष्ठत्वेनेयं तथै
कादशे ॥ ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये ॥ अंजः पुंसामविदुषां विद्धि भागवतान्
हितानिति ॥ तत्र संस्कारेषु तापो नाम शंखचक्रधारणं ॥ तत्र प्रमाणं श्रुतिः ॥ पवित्रं ते वि
ततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ॥ अतप्ततनुर्न तदामो अश्नुते सृतास इद्व
हंतस्तत्समाशत इति ऋग्वेदे ॥ अस्यार्थः हे ब्रह्मणस्पते चतुर्मुखस्यापि नायक ॥ प्रभुस्त्वं

विश्वेषांसर्वेषांगात्राणिपर्यैषिव्याप्नोषितेव्यापकस्यतवविततंपवित्रंचक्रंसुदर्शनं
सहस्रारंपवित्रंचरणंपविरितिनैघंटकाः॥श्रीभाष्येच॥पवित्रंचरणंचक्रंलोकधारं
सुदर्शनं॥पर्यायवाचकाह्येतेचक्रस्यपरमात्मनइति॥अत्रयत्रस्तीत्यध्याहार्यंतेनअ
तप्ततनूःअतएवामःअपक्वःअदग्धपापइतिपावनं॥तत्सिद्धंमोक्षलक्षणंसुखविशे
षंनाश्नुते॥तत्पवित्रंसदावहंतःअतएवसतापसः॥परिपक्वस्तत्सुखमासतेअश्नुवतइत्य
र्थः॥अत्रातप्ततनूरित्यस्यप्रतिसंबंधितयावहंतइत्युक्तेः॥तप्तचक्रधारणमेवौगम्यतेअ
स्याएवऋचस्तात्पर्यंसामवेदेमैत्रावरुणशाखायांकाचनश्रुतिर्विशदीकरोति॥यथाप
वित्रमित्यग्निः॥अग्निर्वैसहस्रारःसहस्रारोनेमिःमिनातप्ततनूर्ब्राह्मणःसायुज्यसलोक
तामाप्नोतीत्युपनिषत्॥अत्रनेमिशब्देननेमियुक्तंचक्रमित्युच्यते॥सहस्रारशब्दान्नुगु

३४ पु एणात् स्पष्टमन्यत्॥ स्मृत्यादिषु सर्वेष्वपि वैदिकप्रमाणेष्वनुसंधेयानि विस्तरभियानात्र प्रपंच्यंते
॥ ननु स्वशरीरेऽन्यदेवान्नवेदत्रिकिणो द्विज इति किणकरणनिषेधात् तप्तचक्रादिधारणं
निषिध्यते अत्र यश्च किणाश्चायुधघातज्याघातनिमित्ता इति तत्त्वाख्याने निरवद्यमाख्यातत्वा
त् यदि च किणकरणमात्रनिषेधपरं॥ तदा त्रिशूलाद्यो व्यर्थः स्यात्॥ अनेन रागासंच्छिन्नगा
त्राणं न स्यात् सारत्रिकं सुखं संग्रामसमन्वयरोगाद्येवला छिन्नेन दृष्यतीति वचनमपि गतार्थं
ण रागाहृतविषयत्वान्निषेधस्य चक्रादिधारणस्य तु विधिप्रमाणत्वात्॥ महोपनिषदि दक्षिणे तु य
भुजे विप्रो बिभृयाद्वै सुदर्शनं॥ सव्ये तु शंखं बिभृयादिति वेदविदो विदुरिति किंचाच्छेदन
मेव निषिद्धं न तु दाहः॥ ननु न धार्यं देवताचिह्नमिति वचनस्य का गतिरिति चेत्॥ सामान्य
देवताचिह्नधारणस्यैव निषेधो विशेषतो विष्णुचिह्नधारणं तु विधिरेव अतो यथाऽग्नीषो ३४

द्या

मीपमश्चालेनन विधिनासामान्यकृतहिंसानिषेधवाधस्तथात्रापिगरहिणोमुंडननि-
षेधस्यदीक्षांगालेश्मश्रुकेशावपनविधिनैववचनस्यबाधएवमतः कृतिविरुद्धत
यादुष्टकल्पितत्वा निषेधवचनानि॥ पतिव्रतायानकरोतिजारंतंव्याधियोनिंनियतं-
विजॐदितिवदुन्मत्तभाषणानिनिन्द्यानितथाचवृहन्मनुः ऊर्द्ध्वपुंड्रंतथाचक्रंनित्यं
धारयतेनरः। तेनतस्यायुष्यंनश्येच्छुभंतस्यविवर्द्धते॥ शांडिल्यस्मृतौ पश्चपुत्रादिकं-
सर्वंगृहोपकरणानिच॥ अंकयेच्छंखचक्राभ्यांनामकुर्याच्चवैष्णवं॥ नमुद्रयेदासना
निशयनानिमहीतले॥ स्थापयेत्क्षेत्रमध्येतुशिलांचक्रादिचिह्नितामिति॥ सनत्कुमा
रसंहितायां॥ सर्वपापविनाशंहिरथांगस्यतुधारणं॥ सर्वकल्याणदमिहपश्चात्सं
सारनाशनंसुवर्णेरजताद्यैर्वालोहेनापितथैवचतथारथांगमष्टारंसुनाभंच

३५ सुदर्शनकं ज्वालाचतुष्कसंयुक्तं कृत्वा चैव विधानतः अग्नौ प्रताप्य विधिवद्दहेद्यत्नात्किसंयुतर ओ
तिहारिते ॥ तस्माच्चक्रं विधानेन शंखं वै धारयेद्द्विजः सर्वाश्रमेषु च सतां स्त्रीणां च श्रुति
बोधनात् ॥ अनायुधासो असुरा अदेवा इति वै श्रुतिरिति [illegible] ॥ पवित्रं पवित्रमर्चिषि ब्रह्म तेन
न पुनीमहे इति श्रुतेश्च ॥ अथ पुंड्रं महोपनिषदि ऊर्ध्वपुंड्रः परमेष्ठिना तारे नारायणे सांख्य
मु योगाधिगम्ये ॥ ज्ञात्वा विमुच्येत नरः समस्तसंसारपाशैरिह चैव विष्णुमिति ॥ ऊर्ध्वपुंड्रं ज्ञा
त्वैतन्मन्त्रं मुमुक्षुर्नरो धृतोर्ध्वपुंड्रो ध्यायेदिति विध्यर्थः सांख्ययोगाधिगम्यं ज्ञानयोगकर्मयो
गाभ्यां भक्तिद्वारेणाधिगम्यमित्यर्थः समस्तैः संसारपाशैरिति विविधहेतुभूतैः पुण्यैः पापैस्त
न्मूलै रागादिभिश्चेत्यर्थः ॥ इह चैव मुच्यत इत्येतत् ॥ तमेवं विद्वानमृत इह भवतीत्यादिकं
चोत्तरपूर्वाघाश्लेषविनाशानादिपरमिति सूत्रकारैरेव निर्णीते ॥ यः करोत्यूर्ध्वपुंड्रं तु संधा ३५

(७८)

वंदनकर्मसु ॥ तेनाहं सुलभो ब्रह्मन्नेकस्मिन्नेव जन्मनि ॥ यावज्जीवमिदं पुण्यमूर्ध्वपुंड्रं
दधाति यः ॥ जन्मन्यनंतरे मुक्तिं स ध्रुवः प्राप्नोति दुर्लभामित्युपबृंहणभूतब्रह्मांडवचनानु
सारेणैकस्मिन्नेव जन्मनि मोक्ष इति तात्पर्यं ॥ तथा कठशाखायां ॥ धृतोर्ध्वपुंड्रं धृतचक्रधारी
विष्णुं परं ध्यायति यो महात्मा स्वरेण मंत्रेण सदा हृदि स्थितं परात्परं यन्महतो महांतमि
त्यादिनोर्ध्वपुंड्रधारणं ॥ सर्वेषां विहितं कीदृशं तस्य संस्थानमित्यपेक्षायां न्नाँवर्णोहरेः थ
पादाकृतिमात्मनो हिताय मध्ये छिद्रमूर्ध्वपुंड्रं यो धारयति परस्य प्रियो भवति ॥ स पुण्यवा
न्भवति स मुक्तिमान्भवति ॥ अनेन संस्थानस्य विहितत्वादाथर्वणवाक्येन सर्वशाखात्र
त्वन्यायेन्यशाखांतरेष्वेतदेव संस्थानमभिमतमिति गम्यते ॥ नारदीये ॥ सर्वजातिषु यो मर्त्यो
विष्णुभक्तो भवेन्मुने तस्योर्ध्वपुंड्रकरणेऽधिकारो बुधैः स्मृत इति ॥ ब्रह्मांडे ॥ सर्ववर्णेषुम

३६

न्यक्ताङ्कुर्वीरन्नूर्ध्वपुण्ड्रकं ॥ ब्राह्मणश्च विशेषेण जपहोमपरायणः । किमत्रोक्तेन बहुना धा-
रयेदूर्ध्वपुण्ड्रकं ॥ योन धारयेत मत्र्योमामकं चिह्नमीदृशं ॥ तं त्यजामि दुरात्मानं मदीयाज्ञाति-
लंघिनं ॥ तस्मान्मां प्राप्तुमिच्छद्भिर्वैष्णवैर्विमलाशयैः ॥ ऊर्ध्वपुण्ड्रमिदं धार्यमघसंसारमोक्षण-
मित्यादितदेवं सर्वेषामूर्ध्वपुण्ड्रधारणेधिकारः । नव्यंऊर्ध्वपुण्ड्रं ॥ मदाष्टमंत्रे योद्वंद्वे नित्यमात्म-
वान् ॥ तस्य प्रसादं कुरुते विष्णुर्लोकनमस्कृत इति नारदीये च मद्भूयं प्रथमं श्लिष्टं तत्रकार-
णमुच्यते द्व्युत्स्का उद्धृतासीत्यादिकां प्रतिष्ठितमिसंतोक्ष्य तिमुपादाय ॥ तस्मान्मुमन्त्रिका-
ख्याख्यापर्वत्रयेषु नित्यशः मन्त्रिकायां प्रधानत्वं वक्तितन्नापराक्ष्य तिरियुक्ता ॥ क्ष्मस्वक्रांत
इति मंत्रमुपादाय प्रत्यक्षक्ष्य तिरित्याह तस्माच्छ्रेष्ठतमा हि मद्विष्णुकं मदलाभ्रदशायां चे-
तरगतहणमितिनिर्णीतं ॥ श्रीवाराहे ॥ एकांतिनो महाभागा मत्स्वरूपविदो मलाः ॥ शांतरा

३६

लान्प्रकुर्वीरन्॥ पुंड्रान्समपदाकृतीन्॥ इति॥ आह मरीचिः॥ चतुरंगुलमूर्द्ध्वगतमंगुलं विस्ता
रमदा॥ द्विजः पुंड्रमृजुं सौम्यं सांतरालं तु धारयेत्॥ अच्छिद्रमूर्द्ध्वपुंड्रं तु यः करोति विमूढधी
ः॥ स पर्यायेण तानेति नरकानेकविंशतिमिति पारमेष्ठ्यसंहितायां॥ ऋजुं सुपार्श्वमूर्द्ध्वमितं
कुर्याद्दलपर्यमध्यमं॥ पार्श्वयोर्घनविन्याससमूर्द्ध्वपुंड्रमिहोच्यत इति॥ अलपर्यमध्यममिति
अतिशयितसांतरालमित्यर्थः तदेवं हरिपदसमानलं सांतरालं सोपबृंहणं श्रुतिसिद्धं
वसिष्ठस्मृतौ॥ नासिकामूलमारभ्य केशांतं सुप्रकल्पयेत्॥ हारिणा च चूर्णेन कुंकुमेन सुगं
धिनेति हारीते॥ श्राद्धे दाने तथा होमे स्वाध्याये पितृतर्प्पणे॥ अद्वयाच्चोर्द्ध्वपुंड्राणि विन्यस्या द्वि
जसत्तमः॥ पुंड्राणामंतराले तु हरिद्रां धारयेच्छ्रियमिति॥ तत्रैवाम्नाय जातमिति॥ अत्र वा कुं
कुमं तेषु धारयेदिति पाद्मोत्तरखंडे तत्र पुंड्राणि तन्मूर्तिं ध्यात्वा मंत्रेण धारयेत्॥ अंतरा

३७

लेषु सर्वेषु हरिं त्रांधारयेच्छुम्नामिति ॥ तदेवं पुंड्रधारणं कार्यं ॥ अथ मंहारीते ॥ यस्मिन्मासि
जर्वेद्दाहातन्मूर्तेर्नाममनोदितं ॥ यद्वा कृष्णरामादिनाम ॥ तत्रैवं शांक्नावेशावताराणं वर्जयन्ना
मवैष्णवइति मंत्रस्तस्मात्संप्रदायप्राप्तसदाचार्यमुखाज्ञातव्यः ॥ आचार्योपि ॥ त्वं माता सर्व
लोकानां सर्वलोकेश्वरप्रिये ॥ अपराधस्तु तेजुष्टमास्मयस्त्वेन म...तमित्युक्त्वा श्रीप्रपत्तिं का
रयित्वा मंत्रमुपदिशेत् ॥ एवं प्रपद्यलक्ष्मीं तां श्रियं सद्गुरुर्भावतइति हारीतोक्तेः यागस्त
॥ श्रीगुरुहरिवैष्णवोद्देशेन द्रव्यत्यागउक्तं च पाद्मे ॥ लब्धमंत्रस्तदाचार्यं पूजयेद्भूषणादिभि
रित्यादि हारीते तु ॥ आचार्योन्नगवंतं समभ्यर्च्य शिष्याय नित्यार्चनार्थं समर्पयेदिति यागः
शास्त्रार्थस्तूक्तः ॥ एवं प्रपन्नस्तु तस्य काशाकमंत्रांतरसद्भावेपि द्वयेनैव कार्यं तदुक्तं ॥ द्वये
न सदृशं लोके वेदे च न हि दृश्यते तस्मात्तेनैव शरणं प्रपद्येत रमापतिं किंच ॥ मद्भक्तपूजाभ्य

यु

हा
ये

३७

धिकाश्वहं हरे तव पादैकमूलदासानुदासो [illegible] भविताऽस्मि भूयः॥ जन्मांतरस

हस्रेषु यस्य स्यान्मतिरीदृशी॥ दासोऽहं विष्णुभक्तानामिति सर्वार्थसाधकमित्यादिप्रामाण्या

त्तदीयशेषत्वस्वरूपतयाऽन्यत् किंचनातः परतरं तीर्थं वैष्णवांघ्रिजलात्स्मृतात्। येषां पादो

दकं पुण्यं गंगामपि पुनाति हीति पाराशरोक्त्या वैष्णवानां विष्णुदृष्टीति नारदाद्युक्त्या च महा

भागवतानां तु पिबेत्पादोदकं तु यः शिरसा धारयेद्भक्त्या सर्वपापैः प्रमुच्यते॥ एतत्समस्तपा

पानां प्रायश्चित्तं मनीषिभिः निर्णीतं भगवद्भक्तपादामृतनिषेवणं॥ गोहत्ता महापापी गोम

हाभागवतैर्द्विजैः सर्वापराधैर्मुच्येत परां वृत्तिं च विंदतीत्यादिहारीतोक्त्या श्रीवैष्णवपा

दतीर्थं स्वीकार्यं॥ तदुक्तं पाद्मोत्तरखंडोक्तश्रीरामचरित्रे श्रीरामवाक्यं॥ ततो वाचैव धर्मा

त्माशरणागतवें लैंव (त्सल) यस्मान्नपुण्येन संगतास्तु भवारिणामुक्ता भवंतु मच्छायाहं गोषापा

स पा

२८

पनाशिनी ॥ एवमुक्त्वा तु काकुत्स्थः शबरीतीर्थमुत्तमं गंगागायासमं चक्रे शार्ङ्गकोद्याम
हाबलं महात्मा भगवतां च तीर्थं पस्पोदरे वसेत् ॥ तच्छरीरं जगाहं ह्येतविष्णुतिनः संशयः ॥ इ
तिपराशरस्मृतौ ॥ शापात्तु रघुनाथस्य विमुक्ता गौतमीनदी वैष्णवीस्नानपुण्येन संगता
श्च नवारिणां कथं ॥ तदाहरेस्तु सापहता सीता तेन प्रष्टा महात्मना ॥ नाश्नाशं सतदा तस्मै गौत
मीतमसाहृता तेन शापात्तदा गंगा राघवेण महात्मना ॥ न लब्धं शंसमिंदुर्वृद्धे ज्ञात्वापि मम जानकी
ष्य ॥ त्वं च प्रत्यतिसर्वैस्तु न स्नातव्यानि विदितीति शापात् ॥ शबरीस्नानजलेन श्रीरामधनुराकृ
ष्टेन संगता गौतमी विमुक्तेत्यर्थः किं च ॥ गुरूणां मृतुदिवसे भगवज्जन्मवासरे कान्तिकोत्स
श्रावणे वापि कुर्याद्विशिष्टं च वैष्णवीमिति ॥ हारीतोक्त्या ॥ श्रीवैष्णवसमाराधनं कार्यं किं च ॥ भ
गवन्निवेदितं भोजनमप्यावश्यकं ॥ तदुक्तमेकादशे ॥ त्वयोपभुक्तस्रग्गंधवासोलंकार

२८

(78)

चर्च्चिताः । उच्छिष्टभोजिनो दासास्तव मायां जयेमहीति । तथाहि दिरूपं मुखेनाम नैवे
द्यमुद्दरे हरेः । पादोदकं च निर्माल्यं यस्माद्धि सवैष्णव । इत्यादेः ननु स्वयमर्पितं स्वयं
कथं भोज्यं दत्तापहारदोषप्रसंगादिति । अत्रोच्यते । वाचनिकेर्थे युक्तेरप्रयोजकत्वात् । त
थाहि अष्टमस्कंधे अदितिं प्रति कश्यपेन । पयोव्रतसंबंधि भगवत्पूजाविधिं निरूपयता ॥
निवेदितं तद्भक्ता यदद्याद्भुंजीत वा स्वयमिति भुक्त्वा स्वनिवेदितस्यैव भोजनमुक्तं किंच वैष्ण
वमात्वतेभ्यः प्रतिपादयेदित्यादिना प्रतिपाद्यत्वेन विहितं भगवते दत्तं नैवेद्यं निर्माल्या
दिकं सात्वतत्वाविशेषाद्भक्तेन स्वयमपि भोजनधारणादिना स्वोपयोगकार्यमेव स्वयं
मपि ग्रहणे प्रतिपत्तिः सिध्यति । यथाग्न्याद्युद्देशे उत्पन्नस्य पुरोडाशस्यापि यजमानपं
चमाः पुरोडाशं भक्षयंतीति प्रतिपत्तिस्तथेदमपि वचनादेवान्यथा सात्वतेभ्योपि

२९

नप्रतिपादयेतदक्षमत्वात् ॥ वचनादिति चेत् न न हि वचनेस्ववर्जनमुक्तं ॥ अथ तर्हि वा
नेऽस्मै दद्यादित्यादिना ब्राह्मणत्वादात्मनेपि दानप्रसंग इति चेन्न दानस्य स्वस्वनिरासे त्व
न परस्वत्वापादनरूपत्वात् ॥ नचैवं प्रतिपन्नौ युक्तं पुरोडाशस्य यजमानेपि प्रतिपन्निदर्श
नात् प्रतिपन्निस्तु स्वत्वासादिकैव कृयादिवत् किंच ॥ तेर्द्दानप्रदायेऽस्मै योग्युक्ते स्तेन ए
वमइत्यत्र समानकर्तृकत्वात्स्वस्वत्वध्वंसे समानकर्तृत्वप्रतीतोक्ता समन्निआहतनञः
सामानाधिकरण्येनान्वयात् ॥ कस्मैनांतरे मानाभावाद्बाधकं विनादेवेभ्यो दत्तमपिन्नोक्ष
त्वमेवस्वयं दत्तपाद्यादिवत् ॥ विष्णुप्रतिमापटलैश्चोषन्तुक्तं प्रश्नोपसंतिमुनयस्तत्वदर्शिनः
युवानःखलु वांछंति तांबूलं तरुणीमुखादिति ॥ अत्र तरुणीमुखगततांबूलदृष्टांतवच
नाच्छेषशास्त्रोनिंदितवचनएवनत्वतदवशिष्टवचनइति निवेदितोजितिनिम्नगतिवि

२९

षकेनैव यजेच्छेषाशनं देवं शेषाशनाभिधानस्येत्यादिभिः । शेषाशनशब्दप्रयोगात् ।
द्वयाख्यसंहितायां षोडशोपटले समयोपदेशे नानिवेद्य हरेः । किंचिन्नोक्तव्यं वा पुरोस्त
था । तत्रैव स्वभोजनमध्यदधिक्षीरादेः पूर्वमनिवेदितस्याकस्मादुपस्थितस्य मनसा नि
वेद्यैव भोक्तव्यत्वमुक्तं । तदा कस्मात्स्वत्वं तत्वमनसापि समर्पणं श्लाघ्यादिति शेषः । किंच
यत्करोषि यदश्नासि तत्कुरुष्व मदर्पणमित्यत्र देहधारणाय यदश्नासि [illegible] यत् तन्म
दर्पणं स्यर्थैः तैत्य [illegible] र्पणं समर्पितं यथा भवति तथा शनं कुरु इत्यत्रापि स्वसमर्पि
तस्यैव भोजनमुक्तमिति दिक् । पाश्चेतापादिपंचसंस्कारनवेज्याकर्मकारकः । अर्थ
पंचकविद्विप्रो महाभागवतः स्मृत इति । नवेज्या च सुदर्शनोर्द्ध्वपुंड्रादितस्विन्हैरंकनं
मुजे सद्गुरोर्मंत्रपठनमर्चनं विधिना हरेः । स्मरणं कीर्तनं विष्णोः सेवा च परमात्मन्

५०

नःश्रवणमेतस्यप्रकृतस्यदीप्यानांसमर्चनंप्रसादतीर्थसेवाचभक्तिर्नवविधास्मृता॥

कंच अर्थपंचैप्राप्यस्यब्रह्मणोरूपंप्राप्तुश्चप्रत्यगात्मनः॥प्राप्त्युपायंफलंप्राप्तेस्तथाप्राप्ति

विरोधिच॥ज्ञातव्यमेतदर्थानांपंचकंमंत्रवित्तमैरितियद्यप्येवंप्रपन्नस्यकर्तव्यांतरं

नविद्यतएवसकृत्प्रपत्तेरेवफलसाधनत्वात्सकृदेवप्रपन्नाय सकृदेवहिशास्त्रा

र्थेकृतेयंतारयेन्नरमित्यादिप्रामाण्यात्तथापिभगवन्मुखोल्लासहेतुत्वेननित्यमुक्त

क्रियमाणकैंकर्यवद्यावच्छरीरपातंवर्णाश्रमविहितंकर्मानुष्ठेयमेवंतदुक्तं॥विप्लवा अ

पधर्माणांपालनायकुलस्यचसंग्रहायचलोकानांमर्यादास्थापनायचप्रियायम

मविष्णोश्चदेवदेवस्यशार्ङ्गिणः॥मनीषीवैदिकाचारंमनसापिनलंघयेदिति॥अत्रम

नीषीतिप्रपन्नउच्यतेतस्यैवकरणत्वात्॥एकांतभक्तिदश्चापि स्वाश्रितानांसएव

५०

को

हि ॥ अनपेक्षितसालोक्याद्यनेकसुखदं स्वतः एकांतभक्तिरस्खलनन्यममता विष्णौ म-
मता प्रेमसंयुता ॥ भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैरिति पंचरात्रोक्ता ॥ अन्यम-
मतावर्जिता ममतेत्यन्वयः सकलफलदो हि विष्णुः तं त्वाखिलात्मदयितेश्वरमाश्रि-
तानां सर्वार्थदं स्वकृतविद्विसृजेत को नु वान्यजेत्किमपि विस्मृतये नु भूत्यै किं वा भ-
वेन्न तव पादरजोजुषां न इतीश्वरस्य नु सामर्थ्यं नाल्पं तस्य विद्यतइत्यादि प्रामा-
ण्यात् ॥ अनपेक्षितेति सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानं न गृ-
ह्णंति विना मत्सेवनं जनाः ॥ अथो विभूतिं मम मायिनस्तामैश्वर्यमष्टांगमनु-
प्रवृत्तं ॥ श्रियं भागवतीं वास्पृहयंति भद्रां परस्य मे ते श्नुवते तु लोके इत्यादेः
अपरं च अत्राधुनिकानामुपदेष्टॄणां तादृशाप्रपन्नानि वेपितन्मूलम्नृतपूर्वाचा

श्रीभा

८४

५१

र्याणां तद्वत्त्वेन भगवदनुगृहीतत्वेन सर्वोपपत्तिः यतः स्वानुगृहीतत्वेन सर्वोपप
त्तिः यतः स्वानुगृहीतभक्तप्रवर्त्तितत्वेन तन्मार्गे पक्षपातो भगवतः ॥ अत एव दशमे
ब्रह्मादिवाक्ये ॥ स्वयं समुत्तीर्य सुदुस्तरं द्युमन् ॥ भवार्णवं भीममदभ्रसौहृदाः ॥ भवत्प
दाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवानिति ॥ अत्र भवत्पदाम्भोजसेवोपा
यत्वस्वीकाररूपमार्गसंप्रदायप्रवर्त्तनमेव तन्निधानं तत्संप्रदायप्रवृत्तानां तादृशनि
ष्ठाभावेऽपि तत्संबंधिनामप्यनुग्रहं करोषीति भावेनोक्तं सदनुग्रहो भवानिति ॥ तत्सं

मना

प्रदायिनां यायेन तरणावश्यंभावाय नौत्वनिरूपणमिति ॥ तथा षष्ठे न तथा ह्यघ
वान् राजन् पूयेत तपआदिभिः ॥ यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥ सध्रीची
नो ह्ययं लोके पंथाः क्षेमोऽकुतोभयः ॥ सुशीलाः साधवो यत्र नारायणपरायणा इति

५१

(82)

अत्र साधनमार्ग इवासहायता निमित्तं न भवति ॥ यं यतस्तत्र सुशीलाः साधवो निःकामाः
नारायणपराः संति अतस्तन्मार्गस्थानां तत्सहायेनैव परमपुरुषार्थसिद्धिरिति तन्मा
र्गस्य क्षेमरूपत्वमित्यर्थः किरातहूणांध्रेत्यादि यदपांश्रयाः शुध्यंति तस्मै प्रभविष्णवे न (श्रय)
मः इत्यादेः ॥ इति श्रीरामानुजदासविरचिते विवेकत्रयोपायपरिच्छेदो नाम द्वितीयः प
रिच्छेदः ॥ ॥ ॥ अथेदानीं पुरुषार्थविवेकमाह ॥ ॥ ॥ नैश्वर्यं न च कैवल्यं साध्यं श्रीवै
ष्णवावलेः ॥ किं तु श्रीशानुभूत्यर्थं श्रीसुदृष्टासितसेवनं ॥ श्रीवैष्णवावलेरिति सिद्धानां सा
धकानां च सर्वेषां श्रीवैष्णवानामित्यर्थः ॥ नैश्वर्यं न च कैवल्यं साध्यं यतः प्रपन्नपारिजा
ते ॥ प ॥ गंधं पुष्पं तथा वासो भूषणादि परान्नयेत् ॥ तथा भोज्यानि चान्नानि नात्मार्थं वैष्ण
वो हरेत् ॥ स्त्रीणां स्त्रीसंगिनां चैव संसर्गं वर्जयेत्सुधीः ॥ तस्मात्सर्वात्मना विद्वान् ॥ विषयाः

५२

न्विषवत्त्यजेत्तद्इति विषयाविष्टचित्तानां विस्मावेशः सुदूरतः वारुणी दिग्गतं वस्तु व्रज
त्यैन्द्री किमाप्नुयादिति ॥ तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः
क्षीयते इत्यादि श्रुतिस्मृत्यादिषु विषयहेयत्वस्य बहुशः प्रसिद्धत्वान्नात्र प्रपंच्यते युक्त्यापि विषया
णां नसुखरूपता ॥ तथाहि रूपलावण्यवति योषिति पिंडे भर्तुः सुखमुदयति सपत्न्या द्वे
षः परिव्राजकस्य घृणा कामुकस्य रागः ॥ एवं नानाबुद्धेरुदयान्नास्ति सुखरूपता म[illegible]दि धा
ष्वपुदरस्य रणानंतरद्वेषोदयदर्शनान्न तथा लौकिं चक्रमेलकं निंदति कोमलेच्छुः क्रमेलकः
कंटकलेपरसैर्न्नप्रियं चंदनं दृष्ट्वा क्रोडाविट्पंक कांक्षिण इत्यादि कस्माच्च घ्राणेषु विषयवि-
कां षयकहेयोपादेयबुद्धेरनै[illegible]त्यान्न विषयजातं सुखरूपमिति न नु केवलस्य सनित्यत्वात्सु
खरूपत्वाच्च पुरुषार्थता स्त्वमेवं ॥ नास्तीति किं विगणयंत्यपि ते प्रसादं किं त्वं दर्पितमयं स्तुव ५२
न्य

उन्नपेस्ते ॥ येंगात्वदंघ्रिशरणान्नवतः कपायाः कीर्त्तन्पतीर्थयशसः कुम्मालारसज्ञाः स्वर्गा
पवर्गनरकेष्वपितुल्यार्थदर्शिनः ॥ मत्सेवयाप्रतीतं च सालोक्यादिचतुष्टयं ॥ नेछंति सेव
यापूर्णाः कुतोन्यत्कालविद्रुतमित्यादौ ॥ श्रीभागवते ॥ तस्यापिहेयत्वश्रवणात् ॥ तदुक्तं पूर्व
वर्चार्यैः ॥ भोगाइमे विधिशिवादिपदं च किंच स्वात्मानुभूतिरिति याकिल मुक्तिरुक्तास
र्वेतद्रूषजलजोषमहं जुषे न हन्त्यन्दिनाथ तव दास्यमहारसेन्दुतिकस्तर्हि पुरुषार्थः ॥ इत्यत्र स
श्वाह ॥ किं त्विति ॥ पतिं विश्वस्यात्मेश्वरं सकारणं कारणाधिपाधिपः सर्वस्येशानः ॥ यस्या
त्माशरीरं दासभूताः स्वतः सर्वे ह्यात्मानः ॥ परमात्मनः स्याज्जीवनेछायदि तेस्वसत्तायां
स्पृहायदि ॥ श्वात्मदास्यं हरेः स्वाम्यं स्वभावं च सदास्मर स्वत्वमात्मनि संजातं स्वामित्वं ब्रह्म
णि स्थितं ॥ उभयोरेष संबंधो न परो भिमतो मम ॥ श्रीमंत्रार्थे पिपाद्मे श्रीमते बिम्बवेतुम्म

४२

दास्यमेवैकरोम्यहं देशाकालाद्यवस्थासु कमलापतेरित्यादिश्रुतिस्मृतिसिद्धं स्वाभाविक
दास्यमेव विनाम तत्रैव न जनाइति ॥ श्रीमद्भागवद्वाक्यात् ॥ यस्मात्तु दास्यमेवास्मत्सितास
हं किल वत्रे इति वलिवाक्याच्च ॥ यथा श्रीकृष्णपदमहिषीवाक्यं न वयं साध्वि साम्राज्यं स्वा
राज्यं भौज्यमप्युत वैराज्यं पारमेष्ठ्यं वानन्त्यं नेत्यं वा हरेः पदं कामयामह एतस्य श्रीमत्पादर
जः श्रियः कुचकुंकुमगंधाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥ व्रजस्त्रियो यद्वांछंति पुलिंदस्तृण
वीरुधः ॥ गावश्चारयतो गोपाः पादस्पर्शं महात्मन इति साम्राज्यादीनि तु सार्वभौमेन्द्रप
दतद्वन्यपन्नोक्ताणिमादिसिद्धिश्चात्मब्रह्मपदमोक्षसालोक्यादीनि क्रमेण ज्ञेयानि पा
दस्पर्शं सेवारूपमित्यर्थः ॥ तथा तत्प्रसंगएव प्रस्तुतमापनवराहणपादशौचतांवूलवि
ध्यमणावीजनगंधमाल्यैकेशप्रसाधनस्नानस्नपनोपहार्यैर्दासीशतान्यपि विभो विदधु

दासोऽहं

४२

(४२)

स्यदास्यमितिएवंश्रीभागवतेपिप्रतिपदमिदमेवोदितंतत्रतत्त्वान्वेष्टव्यंनतुदास्यस्य

शेषत्वपारतंत्र्यरूपतयादुःखरूपत्वमेवदृष्टं॥ उक्तंच॥ स्वातंत्र्यंमुक्तिःपारतंत्र्यंबंधइ

ति॥ सर्वंपरवशंदुःखंसर्वमात्मवशंसुखमितिनिषेधतिचपारतंत्र्ये॥ सेवाश्ववृत्तिर्व्याख्या

तातस्मात्तांपरिवर्ज्जयेदितिश्रुतिश्चमुक्तस्यस्वातंत्र्यमेवंदर्शयतिस्वराड्भवतीतिसूत्रं

ति चअतएवचानन्याधिपतिरिति॥ तस्मात्कथंजीवस्यपारतंत्र्येसुखमिति॥ अत्रोच्यतेतत

त्रमुक्तोपि॥ कदाचित् दुःखीचेतनत्वेसतिपर॥ तंत्रत्वात् शेषत्वात्वायंप्रतिपन्नवदि

तिहिप्रयोगःस्यात्॥ तत्रतावत्सर्वत्र॥ मुक्तस्यदुःखरहितनिरतिशयानंदविधायकैः॥

स्वशरीरंवाचसंतंप्रियाप्रियेनस्पृशतः रसंह्येवायंलब्ध्वानंदीभवतीत्यादिश्रुतिशतैर्वा

धःसुगमः उपाधिश्चदुःकर्ममूलत्वदुःकर्मजनितात्वात्मादिदुःखकारणयोगित्वमि

त्यादिरूह्यः ॥ किंच प्राप्य दुःखित्वेन ॥ सिद्धसाधनं मुक्तिदशायां दुःखीति साध्ये दुःखी दृष्टां
तस्य साध्यविकलता किंच न हि परनिष्प्रत्नतीनां पर ॥ तंत्रात्मार्यपुत्रदासादयः सर्वे सर्वदा
ततो दुःखिनो दृश्यंते प्रत्युत पारतंत्र्यमेव परमं भूषणं मन्यमाना केचित्स्वतंत्रपुत्रादयः स्वा
तंत्र्यनिर्देशे परोषलोहितचक्षुषः परिवादान्निमानिनो विमन्यंते ॥ स्वतंत्रेषु स्वातंत्र्यमे
वानिष्टतमं पारमं पारतंत्र्यं त्विष्टतममेव दृश्यते ॥ तस्मात्स्वातंत्र्याभिमानिनां पारतंत्र्यं दु
ःखाय परतंत्रावस्थितात्मदर्शिनां पारतंत्र्यमेव सुखकारणमिति यथालोकमनुसंधे
यं स्वातंत्र्यमेव सुखकारणं चेत् न कथं सुखशाली स्यात्कीलोत्पाटीव वानरः ॥ अयोगपं
पारतंत्र्यं हि दुःखायेति निषिध्यते तत्तु भगवद्दासे मनीषिणां ॥ ईश्वरोऽहमहं भोगी सि
द्धोहं बलवान्सुखीत्यादिकानुसंधानमासुरं भाव माह भगवान् ॥ स स्वराड्भवति ॥ अ

तएव चानन्याधिपतिरिति श्रुतिः ॥ सर्वैरन्यपि दुःखहेतु ॥ कर्माधीनपारतंत्र्यप्रतिक्षेपप
रे ॥ आत्मतत्वस्य शरीरत्वविधायकश्रुतिवलात्स्वतो दास्यत्वस्यतेश्च तत्संकोचोपपत्ते
ः यस्यानुदास्यमेवास्मत्पितामहः ॥ किल वव्रे इति वलिवचनेन प्रह्लादादीनामपि परि
त्यक्तसकलसुखांतराणां प्रार्थनाश्रवणाच्च विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिणः इ
ति पाद्मवाक्याच्च परमोपादेयत्वमेव दास्यस्य सिद्धं तस्य च देशकालप्रकारदशापरि
च्छेदाभावमाह सर्वत्रेति सर्वदा सर्वविधसर्वदशानुगं स्वरूपोपायसाध्यानां निर्णयो मु प
दाहृतः ॥ श्रुतिश्च स एकधा भवतीत्यारभ्यापरिमितधा भवतीति स सत्यकामः ॥ स
त्यसंकल्पः सर्वेषु लोकेषु कामचारो भवतीति ॥ इमांल्लोकान् कामान्नी कामरूप्यनुसंच
रन्निति च वचनेन तस्य स्वसंकल्पमात्रपरिगृहीतबहुरूपसेष्ट विनियोगानर्हतयाप

89

ववविधकैंकर्यसंभवः॥ तदुक्तं॥ श्रीवत्सचिह्नमिश्रैः॥ अशेषदेशाखिलकालयोगिनी-
ष्वहेत्ववस्थास्वखिलास्वनन्यधीः अशेषदास्यैकरतिः॥ सदाचरन्नकरीश्चावर्त्र्यकदाल
दं तिकेद्वितिकिंच॥ योवेद निहितं गुहायां परमे व्योमन्सोऽश्नुते सर्वान्कामान् सहब्रह्मणा
विपश्चितादित्यादिश्रुतौ तस्य सकलसुखभोगउक्तः॥ यदापश्यः पश्यते रुक्मवर्णं कर्तार
मीशं पुरुषं ब्रह्मयोनिं॥ तदाविद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीत्यादौतु
ज्ञानानंदयोरत्यंतसाम्यमेव विवक्षितं नत्वैभोगमात्रसाम्यलिङ्गाच्चजगद्व्यापारवर्जं इत्या-
दिनाभगवतासूत्रकारेणैवमवस्थापितत्वात्॥ पारम्यविशेषणं च तत्रात्यंतशब्दस्य
वच्छेदकं यथादशवर्णषोडशवर्णसुवर्णनिष्कयोः कांचनकलधौतनिष्कयोर्वा परम-
साम्योक्तौ॥ परिमाणवैषम्यमात्रं निषिध्यते नतुवर्णवैषम्यं तथात्रापि भोगमात्रेपरम-

दू

साम्यं नन्नु जगद्व्यापारादिनाऽऽनंदगणनातुच्छतौ न मुक्तस्यानंदतारतम्यविवक्षया
ऽपि तु ब्रह्मणो निरतिशयानंदत्वविवक्षया सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता
निरंजनः परमं साम्यमुपैतीत्यादिविरोधादेव श्रोत्रियस्य चाकामहतस्य चेत्यत्र संसा
रदशावस्थजीवस्य यथा यथा निःकामत्वं तथा तथोत्कृष्टानंदप्राप्तिरित्येतद्विवक्षि
तमिति॥ आनंदगणनं तु यथा तैत्तिरीयशाखोपनिषदि॥ भीषास्माद्वातः पवते॥
भीषोदेति सूर्यः॥ भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति सैषानंदस्य मीमां॥
मांसा भवति॥ युवा स्यात्साधुयुवाध्यायकः॥ आशिष्ठो दृढिष्ठो बलिष्ठः॥ तस्येयं पृथि
वी सर्वा वित्तस्य पूर्णा स्यात् स एको मानुष आनंदः ते ये शतं मानुषा॥ आनंदाः स एको म
नुष्यगंधर्वाणामानंदः॥ श्रोत्रियस्य चाकामहतस्य ते ये शतं देवगंधर्वाणामानंदाः॥ स ए

कः पितॄणां चिरलोकलोकानामानंदः ॥ श्रोत्रियस्य चाकामहतस्य ते ये शतं पितॄणां चिर
लोकलोकानामानंदाः ॥ स एक आजानजानां देवानामानंदः कर्मदेवाः ॥ ये कर्मणा देवानपि
यंति श्रोत्रियस्य चाकामहतस्य ते ये शतं कर्मदेवानामानंदाः स एको देवानामानंदः ॥ श्रो
त्रियस्य चाकामहतस्य ते ये शतं देवानामानंदाः ॥ स एक इंद्रस्यानंदः श्रोत्रियस्य चाकामह
तस्य ते ये शतमिंद्रस्यानंदाः ॥ स एको बृहस्पतेरानंदः श्रोत्रियस्य चाकामहतस्य ते ये शतं
प्रजापतेरानंदाः ॥ स एको ब्रह्मण आनंदः श्रोत्रियस्य चाकामहतस्य स यश्चायं पुरुषे यश्चा
सावादित्ये स एकः स यः [illegible] एवंवित् ॥ अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्राम
तीत्यादिः किंचास्य राजानस्ते ह्यल्पलोकाः भवंति स विदुषां ह्यल्पलोकत्वकारणमस्य राजत्व
मुच्यते तत्त्वज्ञैः कर्षेकर्माधीनत्वमेव तन्निवृत्तिश्च विदुषः स स्वराड् भवतीत्यत्र विवक्षि

तं॥ अतोपि कर्मविरूपत्वमेवात्र निषिध्यते न स्वात्माविकत्वगावृद्धस्वरूपत्वं अत एव चानन्या
धिपतित्वमेवोक्तं न त्वनधिपतिरिति॥ तस्मात्स्वात्माविकत्वाद्दास्यमेव पुरुषार्थः॥ अनोपा
न्तरखंडे॥ अविछिन्नाः सदा तेषां विष्णुना संगतास्तु ये॥ तत्समानसुखं नित्यं प्राप्नुवंति मनी
षिणः॥ यत्र यत्र हरेर्लोकानाविरूपस्तु तत्र चेतसः॥ नाप्नुवंति पुनः सर्गे स्वर्गस्याद्वजंतवः॥
यथा सौमित्रिर्भरतौ॥ यथा संकर्षणादयः॥ तथा तेनैव जायंते॥ स सलोकाद्यथेच्छया॥ पुन
स्तेनैव यास्यंति तत्पदं शाश्वतं परं॥ न कर्मबंधने जन्म वैष्णवानां च विद्यते॥ विष्णोरनुचर
त्वं हि मोक्षमाहुर्मनीषिणः॥ न वै दास्यं परेशस्य बंधनं परिकीर्तितं॥ सर्वबंधैर्विनिर्मुक्ता
हरिदासा निरामयाः॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोर्ज्जुनः॥ कर्मबंधमया दुः
खमिश्रसौख्यमयप्रदाः॥ बह्वायासफला दुःखजनिनाशैकहेतवः॥ इत्यादि ब्रह्मवै

(९३)

४७

वर्त्ते ॥ हरेरुपासना चात्र सदैव सुखरूपिणी ॥ न च साधनरूपा सा सिद्धिरूपात्र साध्य
त इति ॥ उपासनाविशेषजनितसालोक्याद्यैतत्सह्लोकादिसुखानुभवपूर्वकयत्किंचि
द्भगवत्साक्षात्कारसुखमात्रं न तु यथेष्टकैंकर्यादिसुखमिति दीयमानं न गृह्णंति विना म
त्सेवनं [illegible]ज[illegible]ष्टुसुकमिति नेयं तस्माद्भगवदनुभवजनितप्रीतिकारितसर्वदेशसर्वका-
लसर्वावस्थोचितसर्वप्रकारकैंकर्यमेव परमःपुरुषार्थ इति सिद्धं अत्रांबरीष [illegible] खट्वां
गविभीषणहनुमदादयो व्रजलोकाश्च प्रपन्नत्वेनानुसंधेयाः ॥ अपरं च ॥ एकांतित्वसंबं
धवतो गुरुशापनिमित्तजशूद्रभवस्याजोप्यग्निदाहनैमित्तिकमरणवतोपि ब्रह्मप्राप्ति
स्तत्र वैवस्वतमनुपुत्रपृषध्रदृष्टांतो नवमस्कंधे द्रष्टव्यः ॥ यथाथ एवं राजन् ॥ प्रगुरुणा प्र[illegible]
त्कृतांजलिः ॥ आधारयद्व्रतं वीर ऊर्ध्वरेता मुनिप्रियं ॥ वासुदेवे भगवति सर्वात्मनि परे म-

४७

95

ले॥ एकान्तित्वं गतो भक्त्या सर्वभूतसुहृत्तमः॥ विमुक्तसंगः शांतात्मा संतुष्टोऽपरिग्र प

हः यदृच्छयोपपन्नेन कल्पयन्वृत्तिमात्मनः॥ आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहि

तः विवचारमहीमेतां जडांधवधिराकृतिः॥ एवंवृत्तो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितं॥

तेनोपयुक्तकरणो ब्रह्म प्राप परं मुनिः॥ किंच भरद्वाजसंहितायां॥ प्रपत्तिस्त्रिविधा ज्ञेया

करणत्रयभेदतः॥ गुणत्रयविभेदाद्वप्येकैका त्रिविधा भवेत्॥ प्रणामांकनमुख्येन भा

सलिंगेन केवलं॥ गुर्वधीनाद्भगवति प्रपत्तिः कायिकी क्वचित्॥ अविज्ञातार्थतत्त्वस्य मं

त्रमीरयतः परं॥ गुर्वधीनस्य कस्यापि प्रपत्तिर्वाचिकी भवेत्॥ न्यासलिंगवतांगेन धि

यार्थज्ञस्य तत्त्वतः॥ उपासितगुरोः सम्यक् प्रपत्तिर्मानसी भवेत्॥ यदीच्छन्नतिकूर

लानि सर्वभूतानुकंपिनां॥ प्रपद्यते हरिं मोहात्सा प्रपत्तिस्तु तामसी॥ अभीप्सन् वि

९५

४८

विधानुकामान् ॥ यद्[illegible]र्भगवतवत्सले ॥ प्रपद्यते हृषीकेशं तामिमां राजसीं विदुः प
रित्यज्याखिलान्कामान् ॥ सर्वेषां वात्मेश्वरं हरिं ॥ प्रपद्यते दास्यरुचिर्यद्वैषा सा तु सात्विकी
हीनाहीनतमा चैव राजसा तमसा हृता सत्वेन या प्रयुज्यंते मुख्या स्ताः परिकीर्तिताः ॥ ५
सर्वे नामानपा ॥ विकातत्र मुख्यतमा मता तया हि परमां सिद्धिं सद्यो यांति मनीषिण इति
श्रीमद्गामर्षणे ॥ बद्धांजलिपुटं दीनं याचंतं शरणागतं न हन्यादानृशंस्यार्थमपि शत्रुं प
रंतपेति ॥ श्रीरामोक्तप्रपन्नस्य नपरित्यागः ॥ क्वचिदिति ये यं क्षति श्च मोघमन्नं विंदते अ
प्रचेताः ॥ स्वर्गात्प्रतिष्ठन्नस्य विभ्रष्टचेष्टः गृहीतं प्रपन्नं प्रददाति शत्रवे ॥ येन्द्रादेवाः प्रहरंति
वज्रमिति ॥ तस्मात्प्रपन्नं भगवान्नंगीकरोत्येवेति ॥ ग्रंथार्थमुपसंहरति ॥ स्वरूपोपाय
साध्यानां संग्रहः समुदाहृत ॥ इति पापीयसोपि शरणागतिशास्त्रमाजो नोपेक्षणं मम ४८

का

तवोचितमीश्वरस्यत्वं नयशक्तिकरुणासुमतीषु नेह पापं पराक्रमितुमर्हति मा
मकीनं ॥ ४ ॥ सोयं विवेकत्रयरत्ननामा रामानुजाचार्यकृपैकसिद्धः ग्रंथो मुकुंदैकविव
र्यवंधोः ॥ श्रीवैष्णवानांच मुदं तनोतु ॥ ५ ॥ येषांगुरूणां करुणालवेन सुखं महत्वं च ममा
पिजातं तेषां कृते चोपकृतिर्व्यपेतः स्मिन्नागसां राशिहरान् प्रपद्ये ॥ ६ ॥ अत्र संगतो वापि सु
संगतो वा यो योर्थोभिप्रायं स हृत्साव्यलेखि यो यं हरिप्रेरणयैव तस्मात्स एव संशोधयिता
वधेयः ॥ ७ ॥ यत्कृपाजनितोग्रंथो येनचप्रेरितोस्म्यहं मदीयं चापलं तेन नधार्यं निजमान
से ॥ ८ ॥ श्रीमद्यतींद्रकरुणालवलाभितेन यल्लक्ष्मणेन लिखितं सहयैव तत्र संतः स्वपक्ष
तिन परिशीलनसुखज्ञाः साधुत्वमेव गमयंतु वेदवर्यं ॥ ९ ॥ इति श्रीरामानुजदासविरचिते वि

९९

वेकत्रयरत्ने साध्यविवेको नाम तृतीयः परिच्छेदः ॥ सं० १७६० वर्षे श्रावण सुदि १२ बौ लिषितं

९९

९४

[OrderDescription]
,CREATED=09.10.20 11:29
,TRANSFERRED=2020/10/09 at 11:44:09
,PAGES=98
,TYPE=STD
,NAME=S0003949
,Book Name=M-1302-VIVEK RATANGRANTHE
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,